नं. ४८६ ध

सिद्धान्त सुधानिधिः

५६ पत्राणि

१माध्याय २ य पादः

व्याकरण

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धान्त सुधा-
निधिः 0 56 — पत्राणि
१माध्याय २य पाद

© Dharmartha Trust J&K. Digitized by eGango

नं. ५०

~~प्र~~ थ ग्रन्थपादवितीयपाद ॥

१५७



© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धांत॰ १

ॐ श्रीगणेशाय नमः ॥ ॥ गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ गाङिति गाङादेशस्य ग्रहणं । इङ्कारस्यानन्यार्थत्वादिति द्वितीये वक्ष्याम । तस्मात् कुटादिभ्यश्च परे
ञ्णिद्भिन्नाः प्रत्ययाः ङितः स्युः । अत्र कुटादित्वं कुटेत्युच्चारणोत्तरमुच्चारितत्वं तेन कुटादिष्वेव । तथापि तद्गुणसंविज्ञानबहुव्रीहिणा कुटत्वेन च रूपेण कुटस्यापि
बोधः । न चोभयसाधारणेनैकज्ञानविषयत्वादिना रूपेण कुटस्य तदादीनां च बोधोऽस्त्विति वाच्यं । अतद्गुणसंविज्ञानस्थले बहुव्रीहिपदैकपदा
र्थव्याहत्त्वेन रूपेणैव बोधस्य गाव्यत्वात् । न साधारण्यार्थमत्रापि तथा कल्पनात् । इत्थमत्रापि अन्यपदार्थस्यैकरूपेणैव प्रतीतेः । वृत्तिपद
र्थस्योपलक्षणत्वविशेषणत्वाभ्यामेव बहुव्रीहिद्वैविध्यात् । यं चेत्थं । अतद्गुणसंविज्ञाने लेशमात्रं वृत्तिः । न तद्गुणे तदुभयसाधारणे
न धर्मेण बोध इति विभागात् । तद्गुणस्थले शक्यलक्ष्योभयसाधारणधर्मरूपेण लक्ष्यतावच्छेदकमिति वदन्ति । अत एव वक्षेण भगवादे
शाद्यचि लिप्युक्त्वे रम शब्दे भिन्नत्वसमानाधिकरणसत्त्वेनालीकत्याहत्वेन सर्वोऽनुगमः इति मिश्रादिभिर्व्याख्यातं । ङिदिति वृत्तिदेशः
तेनैकपरत्वपरशब्दः प्रयुज्यमानो विनापि वर्तितद्रथ्यमपतीति । अध्यगीष्ट पमा स्था गा पा जहाति सां हलीति हल्लादिक्ङिदाधेधा
तुकेनिमित्तकईकारादेशः कुटकौटिल्ये वृकुटिथ कुटिता कि.तिचेतिगुणनिषेधः कुङ् शब्दे एते तपर्यंताः कुटादयः अथ केचन मध्व

एम॰ १

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धां तो वैलक्षण्यं किमपि लिखितुं दैवहतकहतस्मरः चित्रेणापि न शक्यते विलिखितुं सर्वांगसंकोचभागिति सुबंधुश्च लिखनेः कुटादावनंतर्कावात् अ
त एव विलेखितुं भीमभु वोलिपीषु इति श्रीहर्ष इति अत्रैव इति प्रमाद एवायं संज्ञापूर्वकविधेरनित्यतयावासमाधेयं केचित्तु एकशेषेण कुटस्या
दिरिति तत्सुरुपं माख्याय लिखितेरपि प्रकृतत्सूत्रेणासंभव इत्याहुः तत्र लेखितेत्यादीनां इति कारहरइत्यादिमिक्तत्वात् श्री लेखनइति
सोत्रप्रयोगविसेधाच्चेति इह पूर्वपक्षवत्ययं भाष्ये निरस्तं तथाहि गाङादिभ्यः परेषां प्रत्ययानां ङितः स्युरित्यर्थे बाधः तपरस्य प्रत्ययस्य इत्संज्ञक ङ
कारहितत्वात् सन्वेगावचनोत्तरसिद्धत्वादेतदधिवैयर्थ्यं नचैवच ङादेरेवानेन विधानं अग्निग्रहदितिपर्युदासैवैयर्थ्यात् तदुक्तं ङितक्कि
द्वचनेनपोरभावादप्रसिद्धिरितिकिंतु इह णामनत्रणामि प्रायं अस्मात्तरहिगाङादिभ्यः कृतिकणिणाद्धिते प्रत्ययानवाइतङितः कितोविधिरिति द्वि
तीयः अभिप्रत्ययस्य ङकार इत्संज्ञको भवतीत्यर्थः इह मीक्रांतस्यैव विधानादादो मध्योंते वेति देशविशेषस्यानपेक्षणात् इतोचध
मेकिप्रयमाणानामपिकार्यविशेषकृतत्वे मैवं इत्याकिंत्विमित्वा नामभावात् अनंतरार्थे चवकृमीहेरभावात् ङिदितितत्सुरूपस्य
वचाच्यत्वादादेः परस्येतिच्यादेः स्थानेङकारादेशप्रसंगात् नवकुटितेत्यादौ प्रसिद्धङित्वाः चङादय एवविधीयंतामिति वाच्यं तेषां

© Dharmartha Trust J&K. Digitized by eGangotri

तदर्थोक्त्यावश्यसामर्थ्यात् तङ्गादीनां चात्र प्रसिद्धिविरहात् एतच्च नादेव तेषामपूर्वविधिस्वीकारे तुङि·च्चेत्यन्तादेशत्वप्रसङ्गात् नचानुवं
धानामसत्तामेव कार्यनिर्वाहकत्वात्कथमादेशत्वं आदेशस्याभावरूपत्वपाऽप्यप्रसङ्ग एव संभवादिति वाच्यं लोपस्यैव वचनसामर्थ्यादित्यसे
ञकङकारस्याप्यादेशत्वसंभवात् स्थानिनि वृत्त्येतरं ङकारस्यानिवृत्तिसंभवात् नचैवमष्टीनिर्देशाभावः पंचम्या प्रथमायाः षष्ठीत्वप्रक
ल्पनोपपत्तेः न देतदुक्तं भवतीति चेदादेशप्रतिषेध इति अक्तितहिं गाङादिभ्यः परोऽञ्णिदित्संज्ञको भवतीति त्वतीपः मैवं क्ङि·तीति श
ब्दात् क्ङितिङि·ति त्वनयोर्भेदात्संज्ञिनामप्रतीत्यापत्तेः परिच्छिन्नपरिमाणानामेव संज्ञात्वात् नह्यनातिरिक्तशब्दोच्चारणे संज्ञा स्वरू
पानुपलंभात् ङि·त्संज्ञाया वाचेः कुटादित्वावचनात्संप्रसारणार्थं तथा लिटः कित्संज्ञापाश्चवविस्वपीति संप्रसारणार्थं न पाठ्यपदतेः
गाङ्कुटादिभ्यः परस्य ङि·त्संज्ञा तन्मापवशादप्रयोजनैव स्यात् किं·तिचेत्तादौ योगिकस्येवग्रहणासंभवात् कितिङितीत्यादौ च कोऽपि
मत्वादनयोरवग्रहःसंभवस्यात् नचचङादीनां ङि·त्वैवपर्थ्यं यत्र संज्ञास्वरूपानुपलब्धिस्तत्र किं·त्वेदेशे पृथग्रहणार्थत्वात् तदुक्तं संज्ञा
करणोक्तिकृद्ग्रहणोऽसंप्रत्ययः शब्दभेदादिति तस्मादनिर्देश एव स्थितः ननु सिसृक्षतिदिदृक्षतेत्यत्र हलंताच्चेति सनः कित्वेवि

© Dharmartha Trust J&K. Digitized by eGangotri

यानेपि स्द जिद्दशोऽर्कस्य भकितीत्यमागमः स्यात् तदुक्तं तद्वदतिदेशोऽत्र किंविधिप्रसंगादिति अतिदेशान्तं स्वाश्रयानिमित्तकत्वात् नैवं किंति
न भवतीति व्याख्यानात् तदुक्तं सिद्धत्वेऽप्रसंगप्रतिषेधादिति अथ चुकुटिषतीत्यादौ सनो ङित्वान्नेदं तस्यात्मनेपदप्रसक्तिः नैवं उपदेशे पि
ङित्त्वं दंतादिति व्याख्यानात् भाष्येतु ङितीव ङिद्वदिति सप्तम्यर्थे वतिमाश्रित्य पूर्वस्य ङितीव कार्यमतिदिश्यते तेन ङिदंतत्वे निबंध
नमात्मनेपदमिति व्याख्यातं यद्यपि किं सिद्धंतु पूर्वस्य कार्यमतिदेशादिति यद्यपीष्टवति नोपात्तस्तथापि अतिदेशान्तं पावकार्यार्थ
त्वाभावाद्व्याख्यानाद्विशिष्टकार्यार्थमेवातिदेश उपदेशग्रहणात्तेन वस्योपलक्षणेनात्मनेपदमिति सामर्थ्यात्पूर्वस्य कार्यमतिदेशो यमिति
भावः इति कैयटः ॥ ॥ विजिट् ॥ विजेः पर इडादिः प्रत्ययो ङिद्वत् वद्धसंज्ञायाः ... अनुवृत्त्याः इडादिरित्यर्थ लाभः आदिमत्तेस्य इपेङि
त्वेश्योजनाभावात् ... लाभः अत एवार्थवद्ग्रहणात् प्रत्ययपरिभाषाभ्यामनुमपुरुषस्यैकवचनस्येट ग्रहणं प्रस
क्तेपि न भवति ... प्रवत्वाभावात् इति न्यासकारः अन्येतु आगमग्रहणस्यावश्यकत्वात्तस्य गुणनिमित्तत्वाभावेन तस्य ङित्वे
विपर्ययाभावत्वार्थलक्षणया इड्वा प्रत्ययोऽपि गृह्यते इडग्रहत्ययस्यादिरेवेति फलितार्थ इडादिप्रत्यय इति अतेमार्गास्य ग्रहणात् ववर्त्रे न्यर्थ

© Dharmartha Trust J&K. Digitized by eGangotri

मित्याहुः विजिरित्यस्य गभावहृत्पस्य नेहन्यहणंबाख्यानात् तत्रद्वगे संभवादिति न स्ह्रदत्तः केचित्तु विवेजिथेत्यत्र थलि क्राक्रादिनियमादि
ट्संभवत्येव तत्रपित्वेनासंयोगाल्लिडिति किंत्वस्याप्रवृत्तेरित्याहुः ॐ विजीभयचलनयोः आयेगणपमुत्कृर्वः उद्विजितोद्विजिष्यते विभा
षोर्णोः ऊर्णुञ् आच्छादने अदादिः असंयोगात्परस्य आदिः प्रत्ययो गाङ्कुटादिः ङित् ऊर्णुनविथ ऊर्णुनविथ ऊर्णुविता ऊर्णविता सार्वधातुकम
पित् अपित्सार्वधातुकं ङिद्वत् तुदति शस्य ङित्वात्र लघूपधगुणः अतिदेशोऽकल्पमानो वितः वतीयांतादेव नतु षष्ठ्यापांतात् सादृश्यानु
योगिनि प्रथमाश्रवणात् अन्यथा षष्ठीसंक्षमोरन्यतरस्यापत्तेरिति दीक्षिताः ननु सूत्रेवतेरभावेद्विवरणवाक्य एवतत्संप्रयोगात् तद्वरोधेन
सूत्रे सप्तम्यापंतत्वापादनेनयुक्तं विवरणवाक्येतत्पादनेनिष्टापत्तिरेव सूत्रे उभयोः समानविभक्त्यंतपदस्य प्रयोगबलादेवोर्गतिदेशाल्ला
भादुपस्थितिविरोधाच्चेति मैवं तृतीयांतादेव वतिमाश्रित्य विवरणवाक्येपि सोत्र विभक्तिसंभवे तत्रापि विभक्त्यंतर कल्पनेप्रमाणा
भावात् कैयटस्याप्यत्रैव स्वारस्यं अथ सार्वधातुकग्रहणं स्पष्टार्थं ङूः निपः पित्वेनतन्ङित्वस्यज्ञापकत्वाभावे पिबङंदीनांङित्वेनार्ध
धातुकानां ङित्वाभावस्य ज्ञाप्यत्वात् नचैवं तातङोङित्वेन सार्वधातुकानामप्यङित्त्वेज्ञापनस्यादितिवाच्यं तिपः पित्वेनामासमप्राप

© Dharmartha Trust J&K. Digitized by eGangotri

प्रापणार्थत्वात् ज्ञापकं च सजातीयापेक्षं तेन सार्वधातुकस्याप्पिङित्त्वज्ञापनस्यानापत्तिः नैवं सजातीयविषयकत्वे चङ्ङौ लुग्विक
रणनां न जिङ्‌ वर्तमानकालानां ङ्‌ निश्भूतकालानामपि ङ्‌ श्चौरणादिकानां न ङ्‌ घञर्थीघानां ज्ञापकः स्यादिति द्धातुकान्तराणां ङि
त्त्वापत्तिः न च प्रत्ययत्वव्याप्यधर्मेण सजातीयं विवक्षणीयं नेत्वं क्वाधर्मेरिति वाच्यं विनिगमकाभावात् स्यादेतत् अपिदिति पर्युदासः
प्रतिषेधो वा नाद्यः एवं ते भवते इत्यादौ शपो तादेशस्य चातो गुण इति पररूपे बहरस्यापित्त्वेऽत्र अपण्णदेकादेशस्यादिवद्भावात्पिङ्
त्त्वसत्त्वात् ङित्त्वेन गुणनिषेधापत्तेः न च पररूपात्पूर्वमेव गुणः पररूपस्य नित्यत्वात् इदं तरंगत्वाच्च यद्यपि सार्वधातुकावयवस्याकारस्यै
कापदेशस्तथापि परं श्यादिवत्वादं न शद्धोऽपित्सार्वधातुके भवत्येवेति ङित्वप्रसंगः यो वेदत्युत्तमैकवचने तु सर्वस्यैव सार्वधातुक
स्यैकादेशान्तित्वप्रसक्तिसौलभ्यं तदुक्तं अपिदिति चेच्छैवैकादेशप्रतिषेध इति न द्वितीयः तुदानि लिखानि आटुत्तमस्यपिच्चेत्या
टू पिदपितोरेकादेशस्यादिवद्भावात्पित्त्वेऽपि ङित्वप्रतिषेधापत्तेः केचित्तु नपित् ङिदिति चेदुत्तमैकादेशप्रतिषेध इति अत्र भाष्यम्
उभयथापि न दोषः एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यवधानादिति यद्यपि एवं ते इत्यत्रैवानीदां गवलीय इति समाधानं तु

© Dharmartha Trust J&K. Digitized by eGangotri

सि०कौ० लमं तथाप्युभयसाधारणपरिहाराभिधित्सया तन्त्राश्रितमिति कैयटः॥ ॥असंयोगाल्लिट् कित्॥ असंयोगात्परोऽपिल्लिट्
४ कित्स्यात्। चक्रतुः। सार्वधातुकार्धधातुकयोरिति गुणे प्राप्ते क्ङिति चेति निषेधः। अदुपधेभ्यो लिटः कित्त्वं गुणाद्विप्रतिषेधेन विभि
५ दतुः बिभिदुरित्यादौ कित्त्वं नित्यं गुणस्त्वनित्यः। ववृते ववृधे इत्यादौ च पौर्वापर्यमनित्यत्वं कित्त्वे कृते गुणस्येव गुणे कृते रपरत्वेन सं
योगात्परत्वात्पाकित्त्वस्याप्रसक्तेः। ततश्च परत्वाद्गुण एव स्यादिति पूर्वविप्रतिषेधारंभः। न च यथा कृतस्य कित्त्वस्य सामर्थ्याद्गुणो बाध्यते तथे
हाप्यतिदेशसामर्थ्यादिति वाच्यं कृतस्य कित्करणे प्रयोजनान्तराभावादिह त्ववकाशत्वात् इह तु संप्रसारणेन कृतार्थत्वाद्दुर्बलातिदे
शमस्य गुणनिषेधस्य दुर्बलत्वात् गुणेन सह विप्रतिषेधानुपपत्तिः। तातङ् न्यायोऽप्यत्रानुसंधेयः। तस्मात्परशब्दमिष्टवाचकमाश्रि
त्य सूत्रेण संगृहीतमेवार्थं स्फुटीकर्तुं वार्त्तिकारंभः स्यादेतत् गाङादिप्रकृतिकस्यान्यस्य ङित्त्वे असंयोगादित्यादौ च कित्त्वमति
दिश्यत इति विशेषे किं बीजं उभयत्राप्यन्यतरस्यैवातिदेशोऽस्तु एतेनोपदेशोऽपि व्याख्यात इति चेन्न अनेनातिकं स्यगुणनिषेधा राम०
त्वे प्रयोजनं वचि स्वपि यजादीनां संप्रसारणं सार्वधातुकपरत्वादि जाग्रो गुणविधिः कुटादीनां ङिद्वत्प्रतिषेधः क्वापि कित्त्वमिति ४

© Dharmartha Trust J&K. Digitized by eGangotri

षष्ठ्व सुप्त इत्यादिवत्क्त्वापि तद्दृत्यादौ संप्रसारणं स्यात् वञ्च इत्यस्य व॰ ङ्क॰ जि॰ दृ॰ दु॰ निवर्त्य ङ्क॰ इति भाष्यं ऋन इत्यादिवद्दशिष्य धमं त्र्यस्य पत
त्वत्रापि स्यात् सुप्त इत्यादिवत् अगित्यत्रापि स्यात् इष्टवानितिवत् यज्ञे त्वत्रापि स्यात् उषित इतिवत् आवस्य इत्यत्रापि स्यात् उदि विदि
भ्यां ङि॰ दित्यतो ङि॰ दित्यनेन वजौ वसेरित्यस्य प्रत्ययः इष्टमितिवत्यजे इत्यत्रापि स्यात् यजया वेति नङ्॰ जागृत इत्यादिवत् जागरित इत्यादावपि क्
ङि॰ तीति पर्युदासः स्यात् गुणो विधिरित्यत्राकारप्रश्लेषे वारित्यागी नु इष्टांत दर्शितेति कैवेपरीत्ये नव्याख्येयं लूत्वा पूगाद् इत्यादिवत् लुविता
इत्यादावपि श्रुकः किती तीड्प्रतिषेधः स्यात् यद्यपि पूर्वस्य कार्यस्यातिदेशः स्थापितः इट्प्रतिषेधस्त्वपरस्यैव कार्यं तथापि किती ति
सप्तमीनिर्देशादिट्प्रतिषेधस्याप्यतिदेशः स्यादित्येतावन्मात्रेणोक्तमिति कैयटः देविलासे वित्वेत्यादिवत् कुटित्वा पुटित्वा इत्यत्रापि
न क्त्वा सेडिति किल्वप्रतिषेधः स्यात् विशेषाभावादौपदेशिकवदातिदेशिकस्यापि कित्वस्य बाधसंभवात् न चौपदेशिककित्वस्य
प्रथमोपस्थितत्वात्तद्बाधे न चरितार्थो निषेधः कथमातिदेशिककित्वं बाधेत अत एव रागप्राप्तहिंसानिषेधे न चरितार्थं न हिंस्यात्सर्वा
भूतानीति शास्त्रं अग्नीषोमीयं पशुमालभेतेत्यादिविहितहिंसायां न प्रवर्तत इति वाचस्पत्यप्राप्तस्यैवातिदेशात्क्त्वो यां कित्वातिदे

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु०
५
5

सत्रतासपर्णात् चकारस्यपथाश्चत्रत्वेतु इट्प्रतिषेधसमुच्चयस्तदर्थः त्व.त्वाप्. त्वाहत्यादिवत् नु विन्वाद्यवि त्वाहत्यत्रापि अमकः किती तिहत्र तिषे
धः स्यात् राःसूत्र वे धू विधू नने अत एव परित्यज्य नाखिलोदय इति श्रीभागवते भाष्यकृतस्तु नैतत्प्रयोजनं ङि. त्वातिदेशो व्योपदेशिक कि
त्वस्य तेन निषेधप्रवृत्त्यान् त्वाध. त्वेत्येव साधुत्वात् विरोधाभावात् त्वाअपकित्वस्यानिवर्तनात् न च येन नाप्राप्तन्यायेन ङि. त्वे न कित्वबाधाप
त्तिः कुटित्वा इत्यादौ कित्वाभावेन नाप्राप्ते कित्वे ङि. त्वातिदेशानारंभादित्याहुः ॥ ॥ इंविभवतिभ्यां च जिइंधीदीधी भू तत्तापो व्यां पापरोपि इन्धि
ट्कित्स्यात् इंधेस्संयोगार्थं ग्रहणं भवतेः पिदर्थं ननु बभूवेति प्रथमणलि च कित्वविधानार्थं अचोञ्णितीति वृद्धेर्निर्दिष्टस्थानिकत्वात्
त्र कि. तिचेति निषेधाप्रवृत्तेः नेव कित्वसामर्थ्यादनिग्लक्षणावृद्धेरपि निषेधः स्यादिति वाच्यं बभूविथेति थलि अकं बभूवेति उत्तमणलि च णि
त्वाभावपक्षे गुणनिषेधेन चरितार्थत्वात् अत्र वार्त्तिकं इंधे भवतिभ्यां च विषयत्वात् भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थकमिति उक्तं स्यत्रेष
त्वाख्यानमेतत् इंधेर्हि अनंतरो लिट्. तत्स्य वा इन्धो गुरुमत इत्या माव्यवधानात् छंदसि त्वमंत्र इति पर्युदासादनुविरहे पि समीधे दस्यवः छं
दस्युमयथेति लिड्: सार्वधातुकत्वात् सार्वधातुकमपिदिति ङित्वात् न लोपः आर्द्धधातुकत्वात्त्वश्रमभावः तथा च मंत्रः त्वामग्ने दध्यङ् ऋषिपुत्र ईधे अथ

एम०
५

© Dharmartha Trust J&K. Digitized by eGangotri

वैराग्यइति सामीप्ये दस्युहंतमम् इति च एवं च लिङ्ग्यवहितपूर्वस्य भाषायां संभवो नास्तीत्यत्र तात्पर्यं ननु सामान्यतः इंधेर्भाषायामप्रयोगोपीति
कैयटादयः एते नहंधिग्रहणसामर्थ्यादस्तिरेव भाषायामप्रयुक्तप्रयोगस्य साधुत्वकल्पनमपास्तं भाष्यवार्त्तिकविरुद्धत्वात् भूआद्य इति स्थित्वे चेत्तेवुकोनि
त्यत्वात् न च शङ्क्यं तस्माच्छस्यानुगनित्यः एकदेशविकृतस्यानन्यत्वात् कृताकृतप्रसंगित्वेन नित्यत्वान्नेपापाच्च उः सुपीत्यतउ इत्युसानन्तरत्वे ष्ठु
किकृते च गुणस्य प्राप्त्यभावात् ॥ ॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा कित्स्यात् नेड्वशिकृतीति वक्ष्यमाणकित्त्वनिषेधस्यापवादः मृड सुखने
मृद क्षोदे गुध परिवेष्टने गुध रोषे वा कुष निष्कर्षे क्लिश हिंसायां क्लिशू हिंसायां दिवादिक्र्यादियोर्द्वयोरप्युपादानं वद व्यक्तायां वाचि वस निवासे उ
षित्वा वसतिक्षुधोरिट् यजादित्वात् संप्रसारणं अत्रेभाष्यं नेड्वशिकृतीति सूत्रं न कर्त्तव्यं इदं सूत्रं मृडादिभ्य एव परस्य क्त्वः कित्वं नान्येभ्य इति नि
यमार्थमस्तु न च मृडादिभ्यः परः क्त्वैव किद्भवति न तु निष्ठादिरिति विपरीतनियमापत्तिः प्रयोगमूलत्वाद्व्याकरणस्मृतेरनिष्टनियमानुपपत्तेः न चा
ल्यते पूत्वा इत्यादावपि कित्वानुपपत्तिः क्त्वामात्रस्य नियमापत्तेः क्त्वोन्तोसुन्कसुन् इत्यत्र विशेषणार्थत्वेन ककारसार्थक्यादिति वाच्यं सेड एव क्त्वो
नियमारंभात् न चैवं घसः क्त्वो निष्ठेति पक्षे क्लिशेरनिट्त्वात् ततः परस्य क्त्वः कित्वविधानं अनिट्क्त्वा कित्वव्याहतम् अर्थस्यादिति वाच्यं गुधकुषक्लि

© Dharmartha Trust J&K. Digitized by eGangotri

सि०कौ०
६६

शांर्ङ्गलो व्युपधादिति किं त्वविकृत्यानित्यत्वात् किं त्वविध्यर्थत्वात् नियमार्थत्वायोगात्॥ ॥रुदविदमुषग्रहिस्वपिप्रच्छः संश्च॥ चकारात्क्त्वाग्रहणं रुदि
त्वा अक्त्वा विमोचने विदित्वा ज्ञाने मुषित्वा स्तेये गृहीत्वा आदाने सुप्त्वा शये पृष्ट्वा ज्ञीप्सायां रुरुदिषति उदितो सपिप्रच्छ्योः सन्नर्थं ग्रहणं किं देवहित्वेति भा
ष्यं न क्त्वा सेडिति निषेधस्य सुश्चापवादस्यात्राप्रवर्त्तेरनिष्कृत्वात् अत एवानिटः क्रौः क्षित्वं नियमार्थत्वमस्य नेति कैयटः॥ ॥इको झल्॥ इगंतात्परो
झलादिः सन् किंत्स्यात् क्वाग्रहणं त्वत्रानिवृत्तं अनिष्ठस्यत सस्वपमेव झलादित्वात् बुभूषति दिदीषते किंत्वेन गुणनिषेधः अत एव एज्विषयत्वाभावा
त्ति दीङ्गो मीनातिमिनोतिदीङामित्यात्वं न नवर्ह्लंतः सन्निरर्थी स्त हेतश्च विचीषिते स्या देः अतो लोपस्थल एव किंत्वं स्यान्न तु विचीषतीत्यादौ सन् श
वकारयोरेकादेशस्य पूर्वं प्रत्यंतवद्भावादिति वाच्यं आदिग्रहणानुवृत्त्या व्याख्यानात् ~ ~ रोनु इत्स्वनग्रह्यते गर्गादिषुजिगीषुशब्दपाठस्य ज्ञापकत्वात्
जयतेः परस्य सनः किंत्वानुपपत्तिप्रसंगात् हलितिप्रत्याहारस्याहृत्य पाद्य तत्समीपस्य हलोऽसंभवाद्हलंताद्वेत्यस्यानवयप्रसंगात् चेत्तिन्या सकारः
अत्र वार्त्तिकं इकः किंत्वं गुणो मा भूत् दीर्घारंभात् कृते भवेत् अनर्थकं तु ह्रस्वार्थं दीर्घाणां तु प्रसज्यते सामर्थ्यात् क्षिपुनर्माभूद्दित्वं दीर्घसंश्रयं दीर्घाणां ना॥
कृते दीर्घेणाले लोपस्य प्रयोजनं अस्यार्थः इको झल् हलंताच्चेत्येक एव योगोस्तु किमर्थो योगविभागः इत्याक्षेपाभिप्रायः यथा श्रुते तु ज्ञेरमाह गु

एम०
६

© Dharmartha Trust J&K. Digitized by eGangotri

णो मा भूदिति सार्वधातुकार्धधातुकयोरित्यनेनेत्यर्थः नन्वत्राकृन्नगमां सनीति दीर्घो येन नाप्राप्तिन्यायेन गुणस्य बाधको भविष्यतीत्याह दीर्घारं
म्भादिति दीर्घोत्तरं गुणप्रसक्तेस्तन्निषेधार्थं कित्वमित्युत्तरमाह कृतेऽपि वेति रूपविशेषाभावेऽपि मंत्रविशेषादिवदावर्त्तमानस्यैव शास्त्रस्य फलसाधना
त्वादिति भावः ननु एवं दीर्घविधिवैयर्थ्यं शास्त्रपूर्वकप्रयोगस्यैव धर्मानिमित्ततया शास्त्रप्रवृत्तिमात्रस्याप्रयोजकत्वादित्याह अनर्थकं त्विति उत्तरमाह
कृतार्थमिति ह्रस्वानां दीर्घविधिसामर्थ्याद्गुणाभावेऽपि दीर्घानां प्रयोजनविरहाद्दीर्घविध्यप्रवृत्त्या गुणः स्यादिति तन्निषेधार्थं कित्वमिति भावः दी
र्घाणां त्विति गुणनिषेधार्थं दीर्घेष्वपि दीर्घशास्त्रं प्रवर्त्तत एव अदाधदहनन्यायस्य फलाभावमूलकत्वात् फलं च ह्रस्वेषु रूपान्तरसंपत्तिः दीर्घेषु तु
रूपान्तरानापत्तिरित्यन्यदेतत् अत एव मो राजि समः क्वाविति मकारस्य मकारादेशविधिः तदेतदुक्तं सामर्थ्याद्धि पुनर्भाव्यमिति ननु दीर्घविधिना गुण
स्येव रकारस्यापि बाधापत्तिः चिकीर्षति जिहीर्षति अज्झनेति दीर्घः ऋत इद्धातोरितीत्वं हि तत्रेष्यते तत्राशंक्याह ऋ इत्वमित्यादि दीर्घत्वव्यतिरेकप्रयु
क्तव्यतिरेकप्रतियोगित्वादिकारादेशस्य न बाध इत्यर्थः उक्तं हि यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति न
नु कृत्स्नानां दीर्घाभावे ह्रस्वप्राप्त्यभावेऽपि दीर्घाणां दीर्घव्यतिरेके रोवहत्वप्राप्तिरस्त्येवेत्याशंक्याह दीर्घाणां नाकृते दीर्घ इति तत्रापि गुणबाधार्थं दीर्घवि

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु० घाभावेह्रस्वस्याप्यभावेपिदीर्घाणां दीर्घमतिरेकेणैवह्रस्वप्राप्तिरहस्येवेत्याशंक्याह दीर्घाणां नाकृते दीर्घे इति तत्रापि गुणबाधार्थं दीर्घविधिरेव प्रपंच
८ वर्त्तयितव्यः अन्यथा इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेनेति गुणप्रसंगादित्यर्थः तदेवं किन्त्वेवैयर्थ्यमाशंक्य सिद्धांतमाह णिलोपस्त्विति ज्ञपिस
7 ति इति स्थिते णौ गुणो लोपो दीर्घत्वं चेति त्रयं प्राप्नोति तत्रासति किन्त्वे निरवकाशत्वाद्विशेषाभावाच्च गुणवल्लोपोपि दीर्घेण बाध्येत पाचयतेः
पाक्ति रित्यादौ णिलोपस्यापि सावकाशत्वात् पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानिति न्यायेन लोप एव बाध्येत गुणस्तु स्यादेव किं
त्वविधाने तु विचीषतीत्यादिषु गुणप्रसक्त्यभावात् तत्रेलब्धावकाशं दीर्घत्वं परत्वाण्णिलोपेन बाध्यत इति सिद्धं स्यादेवत् अस्त्वपि किन्त्वे नत्वाप्राप्त
न्यायेन गुणस्येव दीर्घो बाधको भविष्यति न तु णिलोपस्य गुणबाधेन च सावकाशं दीर्घत्वं परत्वादेव णिलोपे न बाधिष्यत इति अनारभ्यमेव।
किन्त्वं अत्राहुर्बाध्यविशेषचिंतायां तथात्वेपि बाधसामान्यचिंतायां स्वविषये प्राप्तस्य सर्वस्यैव बाधाभ्युपगमात् स्यादेतत् अस्त्वपि किन्त्वेनि
मित्सतिप्रमित्सतीत्यत्र मीनातिमिनोत्योः सनि निरवकाशत्वाद्गुणं बाधित्वा दीर्घः ततो मिनोतेरपि मीग्रहणेन ग्रहणात्तिपदविधानादिसमावे एम०
नगुणबाधः तद्वत्तेरेंचहलंतात्त्वेतिकित्त्वेनलघूपधगुणबाधः तथा च सनिमीमेत्यत्र मीतिसामान्यग्रहणार्थत्वाद्दीर्घविधेश्च इतार्थतायां ज्ञीप्स ८

तीत्यत्र दीर्घं बाधित्वा परत्वादेव णिलोपो बाधिष्यते इति क्त्वा तत्किंत्वेन । मैवं उकारीत्यादीर्घस्य सावकाशत्वात् द्राम्णामपि गुणलोपाभ्यां दीर्घबा
धापत्तेः किंत्वारंभस्यावश्यकत्वात् । न च दीर्घस्य कुङ्धातुरवकाशः चुकूषतीत्यत्र कुटादित्वेनैव कित्त्वाद्गुणनिषेधसिद्धेरिति वाच्यं उकारभाष्या
नुरोधेन दीर्घान्तत्वनिर्णयात् इति कैयटादयः । न च गुप्रीषोत्सर्गो धगाति स्थैर्यपयोः इति सनन्तावकाशः इति वाच्यं तथा सत्युगमहनामित्येव
पाठापत्त्याऽत्र जितिप्रत्याहारग्रहणावैयर्थ्यापत्तेः एवं तु कुङो ह्रस्वान्तत्वेपि बाधकाभाव इति न्यासकाराभिप्रायः ॥ ॥ हलन्ताच्च ॥ अत्र च दस्यावय
वार्थत्वेनन्वयः इको हल्व्यवधानायोगात् इग्वतो हलन्तादिति न्यासे पियक्षतीत्यत्र सम्प्रसारणापत्तिः इगुपधाद्धलन्तादिति न्यासे दंभेः सन्न्याप्तिः
सूत्रभेदश्च तथापि समीपार्थोन्तशब्दः इक्समीपाद्धलः परो झलादिः सन् कित्स्यात् गुह संवरणे जुघुक्षति भिदिर् विदारणे बिभित्सति अयं दंभेः स
निधिं स्याति इत्यत्र नकारस्य सन्न्यरत्वाभावात् भकारस्य च इक्समीपत्वाभावात् कित्त्वाभावेन लोपो न स्यात् उच्यते हलन्ते जातौ भयोरेकमात्रिकत्वे इक्स
रत्वानपायात् तदुक्तं दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति इदं च निपातनैकाजिति कग्रहणेन ज्ञापितं हकारादिषु चाभिन्नाप्रत्ययाभिधा
नाद्धल्त्वजातेः सद्भावः प्रत्येकं भेदाद्व्यक्तिपक्ष एव जातिरिति पक्षेपि भेदाग्रहात्सादृश्याद्वा सिद्धिरिति कैयटः यद्यपि हद्भिः स्तोकेन न्यायेन ह

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ द्वा॰ त्वजातावतिरिक्तायां भानाभावः तथापि हलन्तजन्यायामुपस्थितौ यावतीनां जातीनां हकारादौ प्रत्येकं प्रकारत्वं तदतिरिक्तवृत्तित्व साक्षाद्वा
८ प्यज्ञातस्य न वच्छिन्नत्वमेवात्र विवक्षणीयं ॥ ॥लिङ्सिचावात्मनेपदेषु ॥ इक्तमीपाद्धल्परो झलादी लिङ् आत्मनेपदपरः सिच्च कितौ स्तः कृसी
8 ष्ट कृसीयास्तां कृसीरन् अकृत अकृषातां अकृक्षत ऊदित्वाद्वेट् झलादी किं कल्पिषीष्ट अकल्पिष्टेति इट्पक्षे मा भूत् स्यादेतत् आत्म
नेपदेष्विति निर्धारणसप्तमी परसप्तमी वा नाद्यः निर्धारणस्य सजातीयविषयतया लिङ्सिचोस्तद्विशेषणापत्तेः लिङ्सिचोस्तदेशग्रहणात् न
द्वितीयः सिचोविशेषणेपि लिङः स्यायोगात् सीयुड् विशिष्टस्य लिङः पदार्थत्वेन तदपेक्षया लिङस्तत्वानुपपत्तेः नाप्यर्थद्वयपरत्वं सकृच्छ्रुतत्वात् नाप्येक
शेषः अर्थभेदासहविवक्षाविरहात् अत्र भाष्यं उभयथाप्यदोषइति तथाहि आत्मनेपदपरो लिङ् सिचावित्यर्थः न च सिचस्तेन नोभयभिन्नत्वादात्म
नेपदत्वानुपपत्तिः तत्परत्वेन आत्मनेपदस्य सिचि औपचारिकत्वात् गौणमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रप्रतिबद्धैकशेषाश्रयणात्
द्वितीयोप्यदोषः अवयवगतपौर्वापर्यस्य समुदाये आरोपात् तन्त्रेणार्थद्वयलाभाद्वा परन्तु संभवव्यभिचाराभ्यां सिजेवात्मनेपदेन विशेष्यते न तु लि एम॰
ङ् परस्मैपदेषु लिङो झलादित्वाभावेन तत एव आत्मनेपदग्रहणात् सिच एवात्मनेपदविशेषणस्य वैयर्थ्यात् अथ सिचोप्यात्मनेपदविशेषणं कि ८

© Dharmartha Trust J&K. Digitized by eGangotri

मर्थं अयाक्षीदित्यादौ इकः स्थेव व्यावृत्तेः अचैषीदित्यादौ हल्मत्वाभावादेव तथात्वात् अकोषीदित्यादौ इडागमे कृते हलादित्वाभावात् अमैत्सी
दित्यादौ वदव्रजेति वृद्धेरिग्लक्षणत्वाभावादेव क्ङिति चेति निषेधविरहात् सत्यपि क्ङिति लक्षणत्वविरहात् मैवं अस्राक्षीदद्राक्षीदित्यादौ सृजिदृ
शोरित्यकि इग्लक्षणस्यामागमस्यानुपपत्तिप्रसंगात्॥ ॥ अवर्णान्तपरौ हलादी पूर्वौ कौ कितौ स्तः मथीष्ट मथीयास्तां मथीरन् अमथ
त अमथातां अमथत ० गागमः गमः परौ हलादी पूर्वौ कौ वा कितौ स्तः संगसीष्ट संगंसीष्ट समगत समगंस्त कित्पक्षेऽनुनासिकलो
पः॥ ॥हनः सिच् हन्तेः परः सिच् कित्स्यादात्मनेपदे परे आहत आहसातां आहसत पुनः सिज्ग्रहणं एकयोगनिर्दिष्टानां सहचापवृत्तिः स
ह्वानिवृत्तिरिति ज्ञापनार्थं तेन पूर्वसूत्रद्वये लिङ्सिचावात्मनेपदेष्विति संपूर्णसूत्रानुवृत्तिः॥ ॥यमो गन्धने सिच् वा कित्स्यात् गन्धनं परदोषा
विष्करणं उदायत गन्धने किं उदायंस्त पादं आकृष्टवानित्यर्थः॥ ॥विभाषोपयमने प्राग्वत् रामः सीतामुपायत उपायंस्त महास्त्राणि एवाध्यो
रिष्य सिच् कित्स्यात् इकारान्तादेशः समस्थित समस्थिषातां समस्थिषत अदित अदिषातां अदिषत अत्र वार्त्तिकं ह्रस्वादङ्गात् कारेत्वं दीर्घो मा
भूदिति पिसः अन्तरेस्तु तो मा भूल्लुतश्च विषयेऽस्मतः न चात्र हेतुपदप्रयोगविरहात् षष्ठी हेतुप्रयोगे इत्यस्याप्रसक्त्या कस्येत्यत्र हेतुतृतीया

© Dharmartha Trust J&K. Digitized by eGangotri

सि० कु० पतिः अत्र संबंधित्वेनैव विवक्षितत्वात् मदीयाः पुत्रा इत्यत्र अपत्यत्वप्रकारकविवक्षाविरहेणाण्प्रत्ययोपपत्तेः तकारेत्त्वमित्यत्र कर्मधा
९ रयोत्रेत्त्वमत्ययः दीर्घो मा भूदिति आकारस्थाने आंतरतम्यात्तस्यैव प्रसंगात् भाव्यमानोऽण् सवर्णान्न गृह्णातीति तु परिहारो नोक्तः अप्र
9 त्यामित्यादौ भाव्यमानस्याप्युकारस्य ग्राहकत्वदर्शनात् समाधानांतरसम्भवाच्चेति भावः अतेऽपि सप्तति घुमास्थेत्यादिने वईत्वस्यासि
द्धत्वादिकारविधिसामर्थ्यादेव दीर्घो न भविष्यतीत्यर्थः किंत्वं तु विधेयमेव अन्यथा घुमास्थेत्यस्याप्यप्रवृत्तेः प्रयोजनांतरमाह अनेन त
रे प्लुतो मा भूदिति असदृशे सा आदेशे क्रियमाणे प्लुतोऽपि प्रसज्येत तद्बाधनार्थं तपरत्वमित्यर्थः तदपि गत्यावेः प्लुतश्चेति यद्यनेन प्लुतो वि
धीयते तदा यत्र विषयेऽनेनास्यापि प्रश्नाख्यानयोरित्यादिना प्लुतो विहितस्तत्राप्यनेनेन विधीयेत अस्मिन्कर्तव्ये पूर्वत्रासिद्धमित्यादि मिक प्लुत
स्यासिद्धत्वात् तत्पक्षे नवादर्शः स्यादिति ह्रस्व एव भवतीत्यर्थः केचित्तु तपरत्वसमर्थनमेतत् असदृशादेशे क्रियमाणे दीर्घ एव स्यात्
न च तस्योकरीत्या अन्यथासिद्धिः प्लुतनिवृत्त्यर्थं तपासिद्धस्यापि विधानोपपत्तेः मा भूत्प्लुत इति चेन्न प्लुतश्च विषये स्मृतः सर्वा सतितपरत्वे एम०
न प्राप्नोतीति दीर्घनिवृत्त्यर्थं तपरत्वं स्थितमिति व्याचख्युः प्लुतविधौ तु वाक्यस्य टेरित्यधिकारात्कथमेकस्य प्लुतः स्यादिति चिंत्यमेतदिति कै ९

© Dharmartha Trust J&K. Digitized by eGangotri

पटः॥ गान्त्क्रा सेट् सेट्क्त्वा किन्न स्यात् अत्र वार्त्तिकं नसेडिति कृते कित्त्वे निष्ठायामवधारणात् ज्ञापकान्नपरोक्षायां सनि झल्ग्रहणं विदुः
इत्वं कित्सन्निपातेनेरेतात् तुल्यं सुधीवनि व्यर्थं किदिति देशाद्रहीतिः क्त्वा च विग्रहात् अयमर्थः अकित्त्वे इति च्छेदः नसेडित्येव सूत्रणीयं क्त्वाग्र
हणो फलाभावात् नव मुषित्वा गुधित्वा गुधिता वानिति निष्ठायामपि कित्त्वनिषेधापत्तिः निष्ठा शीङ्स्विदिमिदित्यादि नियमादेव तत्सद्भावात् स एष एवप
र्थे निष्ठानकिदिति स्यात् स्थ्यः पराणिष्टे वकित्त्वं भवतीति विपरीतनियमस्य व्याख्यानादेव परित्यागात् ननु तथापि परोक्षापदं पूर्वाचार्यप्रसि
द्ध्यालिट्परं तत्र कित्त्वनिषेधे पविवपमेत्यादौ आतो लोप इटि चेत्याकारलोपो न स्यादिति चेन्न किं दाद्धधातवं निमित्ती कृत्य तदभावे पि
इट्येव क्ङिति ति सिद्धेः न च न तथापि जग्मिव जग्मिवेत्यादौ गमहनेत्युपधालोपः कित्त्वाभावान्न स्यादिति वाच्यं औपदेशिककित्त्वस्यैवायं निषेधो न
त्वातिदेशिकस्येति व्याख्यानात् असंयोगाल्लिट् किदित्यातिदेशिककित्त्वस्य सुस्थत्वात् न चात्र प्रमाणाभावः इको झलित्यत्र झल्ग्रहणस्यैव मान
त्वात् तद्धि शिशयिषते इत्यत्र कित्त्वं मा भूदित्येतदर्थं आतिदेशिकस्यापि कित्त्वस्य निषेधे तु तत्रेको झलिति कित्त्वमसक्तावपि न सेडित्यनेन ता
न्निषेधसंभवात् झल्ग्रहणं वैयर्थ्यमेव स्यात् यत्तु अत्र ल्लवत्र कित्त्वमिति भाष्यं तत्रान्तरित्यस्य प्राप्तौ चित्येवार्थः निवृत्तस्य निषेधुमशक्यत्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु० इति कैयटः स्यादेतत् स्थाघ्वोरित्यत्रानुवर्तमानमर्थकल्प्यग्रहणं कृत्वादावेव न्याय्यास्यात् उपास्थायिषातामित्यत्र मा भूत् कर्मणि लुङ् स्थास्यत्रा
१० तां इति स्थिते इत्वं चिण्वदिड्भावश्च प्राप्नोति परत्वाच्चिण्वद्भावाद्युक् च प्राप्नोति वृद्धिश्च वृद्ध्यपवादत्वाद्युक् तत्र कृते यकारस्य इत्वं स्यात् न च यु
10 न वृद्धिः सकृद्गतिन्यायात् मैवं कित्वसन्नियोगशिष्टस्य इत्वस्य कित्वव्यतिरेके प्रवृत्त्यनुपपत्तेः अत एव सुधीवा सुपीवेत्यादौ लिसन्नियोगे
नरकारस्य श्रूयमाणेऽपि वभावे न भवति न च नोवर्कुत्रीहरिति न तन्निषेधः तस्य लीमात्रनिषेधकत्वात् सन्नियोगशिष्टानामन्यतरस्याभावे
उभयोरप्यभाव इति परिभाषया वकारादेशनिवृत्तेः स च न्यायो विल्वकादिभ्यश्छस्य लुगित्यत्र छग्रहणेन ज्ञाप्यते यथा आकारस्य इ
त्वे कृते कन्याया देशो पुरीगमे नाकारस्य वृद्ध्यर्थोऽपि ईकारस्य इद्भिः संभवात् तथा च कल्प्यग्रहणं आतिदेशिककित्वस्य न सेडित्यनेन बाधो
नेत्यत्र ज्ञापकं न च यदि गान्त स्थित्वा इत्यादौ आकारलोपो न स्यात् इति वाच्यं इट्येवाश्रितत्वात् तत्सिद्धेः न च जग्मिवान् जघ्निवान् इत्युपधालोपो
न स्यादिति वाच्यं आतिदेशिककित्वेनासिद्धेः न चांगेः कसोऽसंयोगादित्यातिदेशिककित्वस्याप्रवृत्तेः तत्रोपदेशिकस्य च न सेडित्यनेन
बाधात्र लोपो न स्यादिति वाच्यं कसोऽच्छांदसत्वात् न च लिटः सार्वधातुकसंज्ञायामपि सत्वात् सार्वधातुकमपिदिति ङित्त्वे तमेवाश्रित्य ते राम० १०

त्सि धेः कैयटस्तु तत्र नलोपे कृते द्विर्वचने एकादेशे च व्यवस्येकाज्ग्रहणमिति राह । तत्र किं त्वमतिषेधान्नलोपनिवृत्तौ द्विरुक्त्वात्रिस्से
काद्यभावादिति । नैतौ न लोपादी तांच ककमासिद्धकेषु चेष्टतोऽवस्था भाष्यकृतानु परिहारान्तरसम्भवादेव परिहारो न स्त्रित
इति स्थाह । तस्मात्त्वौ ग्रहणान्न कार्यमिति प्राप्ते सत्याह । गल्होतिरिति निगृह्णोति । उपस्निह्यति । निकुवितिः अत्र किं त्वं मा भूत्
सितुत्रे तिइति निषेधोऽग्रहादीनामिति वचनादिट् क्रमेण सम्प्रसारणं गुणाभावेन लोपश्च सिद्धस्त्यर्थः इदानीं त्वाग्रहणं ग्रत्याचवे त्वौ
वेति विग्रहात् योगविभागात् पूङः पूङ् परा सेट् निष्ठा न कित् ततः क्त्वा च पूङः इति निवृत्ते सेट् निष्ठा किं त्वे त्यर्थः ॥ ॥ निष्ठाशीङ् स्वि
दिमिदिक्ष्विदिधृषः सेट् निष्ठा न कित् शयितः विभाषाभावादिकर्मणोरिति वेट् प्रस्वेदितश्चैत्रः प्रक्ष्विदितः इत्यादि सेटूकिं प्रक्ष्विन्नं तेन भा
वे क्ष्विन्नमेव ॥ ॥ मृषस्तितिक्षायां सेट् निष्ठा न कित् मर्षितः तितिक्षायां किं अपमृषितं वाक्यं ॥ ॥ उदुपधाद्भावादिकर्मणोरन्यतर
स्यां उकारोपधाद्भावे आदिकर्मणि च सेट् निष्ठा न कित् पोतितं तेन द्युतितं वा प्रद्योतितः प्रद्युतितो वा चैत्रः आदिकर्मणि किं रुचितं
त्वौ रिचेति क्वनेरिभावे वेति किंतः शब्दिकरणो भास्वापमिद्गने ह गुधितं ॥ पूङः क्त्वा च क्त्वा निष्ठा च न कित् ननु सेडित्यनुवर्तते स्यामिति

© Dharmartha Trust J&K. Digitized by eGangotri

सि० मु०
११

ग्रानुवक्त्वा सेटोरेव क्त्वानिष्ठयोः किञ्च विकल्पः स्यात् तेन श्वयित्वा श्वयित इतिपक्षे स्यात्॥ ॥२३॥ क्त्वाप क्त्वानिष्ठा वनकित् न न सेट्
श्वेति इत्येविकल्पात् अत्र वार्त्तिकं नवा सेट्क्त्वा किदाश्रयत्वादनिटि वा किञ्चमिति अस्यार्थः इद्धिधौ पूङ्श्वेति सूत्रेणारब्धं तेनानिटोरे
वक्त्वानिष्ठयोरयं किञ्च विकल्पः किञ्चपक्षे मृकः कितीति हूप्रतिषेधात् पूत्वा पूत इति तदभावपक्षे तु इह गुणावोः पवित्वा पवित इति
सिद्धं भाष्यकारस्तु जीयास्त्रापठंति नित्यमकिञ्चमिडयोः क्त्वाग्रहणमुत्तरार्थमिति लाघवमनाहत्य सूत्रेकारेणाइद्धिधौ पूङश्चेति पठितं
इत्येवं न विकल्पानुवृत्तिस्तु उत्तरत्रेण ग्रहणात्सिद्धं विवं क्त्वाग्रहणां तदुत्तरार्थं न क्त्वा सेडिति नेन किञ्चनिषेध इति सिद्धे एतत्सूत्राभि
प्रायवर्णनमात्रं कान्यापनेन उक्तरीत्या लाघवे तन्त्रसूत्रे प्रत्याख्यातं नोपधात्थफान्ताद्वा नकारोपधात्थकारफकारान्तात् सेटोत
त् परा सेट्क्त्वा वा किते अत्रं नय ग्रहणांस्पष्टार्थं न्यासकार स्तुन प्रकरणे प्रयलं विनानदंत विधिर्नेति ज्ञापनार्थं न तत् तेनोत्तर सूत्रे अपि
इति सूत्रपराधातुर्गृह्यते नतु अदंत इत्यस्मात् ग्रथित्वा ग्रन्थित्वा गुम्फित्वा गुफित्वा नोपधात्किं कोथित्वा रेफित्वा कुथ पूतीभावे रिफ राम० ११
कत्थन युद्धनिंदा हिंसादानेषु नञ्चरलो व्युपधात् इति विकल्पो दुर्वारइति वाच्यं नोपधग्रहणसामर्थ्यात् वंचिलुंच्यृतश्च पूर्ववत्

© Dharmartha Trust J&K. Digitized by eGangotri

वंचु प्रलोभने लुंच अपनयने वचित्वा वंचित्वा लुचित्वा लुंचित्वा ऋतित्वा अर्तित्वा ऋतिः सौत्रस्तकारांतोस्मादेव निर्देशादिति तत्तीये वक्ष्या
मः इंध उ भाषपक्षेः पंकित्वविकल्पः सार्थकः ॥ ॥ तृषिमृषिकृषेः काश्यपस्य पूर्ववत् काश्यपग्रहणं पूजार्थं विकल्पस्य प्रकृतत्वा
त् तृषित्वा तर्षित्वा इत्यादि त्रि तृषपिपासायां मृषतितिक्षायां कृषविलेखने ॥ ॥ रलो व्युपधाद्धलादेः संश्च नन्वयं कित्वविधिः प्रति
षेधो वा नाद्यः क्त्वाग्रहणवैयर्थ्यात् तत्र कित्सिद्धत्वात् नांत्यः सन्ग्रहणवैयर्थ्यात् तस्य स्वयमेव अकित्वात् मैवं नक्त्वा सेडिति कित्व
निषेधप्राप्त्या विधेरेव युक्तत्वात् उ ऋ इ इग्गी तदन्यतरोपधाद् हलादेः परौ सेटौ सन्क्त्वा च वा कितौ स्तः द्युतिषते द्योतिषते प्र
तित्वा द्योतित्वा रलः किं दिदेविषति देवित्वा व्युपधात् किं विवर्तिषते हलादेः किं ऊकालोज्झ्रस्वदीर्घप्लुतः ऊकाल इति तेष्कालस्येति वक्ष्या
णेयं एकद्वित्रिमात्रा अचः क्रमेण ह्रस्वदीर्घप्लुतसंज्ञाः समाहारेपि सौत्रं पुंस्त्वं न च संज्ञित्रय निर्देशो मानाभावः संज्ञात्रयस्य लिंगत्वात् न
च ह्रस्वदीर्घप्लुत इति संज्ञा एकैवेति वाच्यं ह्रस्वादिशब्दैरेवोत्तरत्र व्यवहारात् समुदायस्य संज्ञात्वविरहात् स्यादेतत् उक्तक्रमेण संज्ञिविदेश्यो
नियामकाभावः न च प्लुतत्रयस्य संज्ञाप्रयोगात् प्रदेशमध्येवा निर्देशे प्रकृतिभावोत्रस्यात् तस्यां तत एव निर्देश इति वाच्यं त्रिमात्रस्यैतेनिर्देशं विना प्लुत

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ कु॰ तंज्ञाविरहे प्रकृतिभावस्य दुरपास्तत्वात् एतेन ह्रस्वस्यापि संज्ञात्वात्सर्वमेव निर्देश इत्यपि परास्तं ह्रस्वसंज्ञाया अपि पूर्वनिर्देशाधीन
१२ त्वात् नैवं विभाषा पृष्टप्रतिवचने हेरिति मात्रिकस्य प्लुतविधानाज्ज्ञापकात् मात्राकालस्यांतनिर्देशे हि तस्यैव प्लुतसंज्ञापत्त्या मात्रिक
12 स्य मात्रिकविधानं व्यर्थं स्यात् न च विसदृशादेशविध्यर्थं तत् आन्तरतम्यपरिभाषया अस्य त्र्यामात्राविधितुमशक्यत्वात् अंते मात्रिकनि
र्देशस्य संदिग्धत्वात् न च तथापि ह्रस्वस्य मध्ये निर्देशः स्यादिति वाच्यं अतो यञि सुपि चेति दीर्घविधानाज्ज्ञापकात् मध्ये मात्रिकनिर्दे
शे हि पूर्ववद्वैयर्थ्यं स्यात् न च द्विमात्रस्यांते निर्देशः स्यादिति वाच्यं ओमभ्यादाने इति द्विमात्रस्य प्लुतविधानात् वैयर्थ्यापत्तिः प्राग्वत् लिंग
द्वयेनांत्यमध्याभ्यां मात्रिकस्यापकृष्टत्वात् परिशेषादादितो निर्देश इति सिद्धा संज्ञिव्यवस्था स्यादेतत् ह्रस्वस्याग्रहणात्तवर्णाग्र
हणे द्वित्रिमात्रयोरपि दीर्घप्लुतसंज्ञापत्तिः तयोस्त्वनशात्वाद्ध्रस्वस्य दीर्घप्लुतसंज्ञाप्रसंगो दोषः अत्र वार्तिकं सिद्धं तु तपरनि
र्देशात् ऊकाल इति पठनीयं तपरत्वाद्धि नश्रान्तकत्वेन न चैवं कृतापां तपरकरणे मध्यमविलंबितयोरुपसंख्यानापत्तिः सिद्धं त्ववस्थि एम॰
तावर्णाद्वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यंत इति तपरत्वे परिहृतत्वात् भाष्यकृता तत्कालग्रहणान्न दोषः ऊ अ इ च इत्युक्तेपि १२

© Dharmartha Trust J&K. Digitized by eGangotri

अथ्वेन ऊकारादिविशेषणोऽभिधानाभावाद्वैयर्थ्यप्रसाङ्कमाशङ्कमिरेवमत्रोविशेषणात् ऊकारादिकालतानात्सदृशस्याचो ग्रहणोसिद्धेपिकालेग्र
हणाच्छ्रूयमाणो नैव ऊकारेण कालविशेषणं तथा स्यात् नत्वन्द्वहीनस्वरौपीत्येतदर्थं षरमात्रस्याचोः संभवात् संज्ञात्रयकरणं च कालशब्दस्य
मात्रिकेणाणुकारेण संबंधात् यथा ग्रहणकशास्त्रे शब्दसंज्ञेत्यनुवर्त्यमशहृसंज्ञायां विधेयायां अणसवर्णग्राहको न भवतीति गुणनामभेद
कृतयाचउदात्तादेर्नामपि मात्रिकाणां ह्रस्वसंज्ञा उदात्तादिसंज्ञासूत्रेऽग्रहणं निवृत्तमिति दीर्घप्लुतानामपि न संज्ञासिद्धिः नचैवं हलामपि न
दापत्तिः अयोग्यत्वात् एकोपणवीत्यादिकं तु न संज्ञाविधानं किं त्वादिसंज्ञेनेति विहितसंज्ञानुवादः इति न दोषः यथा ह्रस्वसंज्ञाविधानसामर्थ्या अ
दीर्घप्लुतयो ह्रस्वसंज्ञा अयाणां ह्रस्वसंज्ञायां हि ह्रस्वप्रदेशेषु अयाणामुपस्थितत्वात् तन्मादेशविधाने ह्रस्वसंज्ञावैयर्थ्यं नचवचनसामर्थ्यादनंत
रतमोप्यादेशः स्यादिति वाच्यं अवद्वत्येव वक्तव्यत्वापत्तेः ह्रस्वसंज्ञायाः फलविशेषाभावात् ननु ह्रस्वसंज्ञायामसत्यां यत्र एचो ह्रस्वो विधीयते तत्र ए
चइगिति प्रदेशेषु वक्तव्यं स्यात् सत्यां तु एच इग्घ्रस्वादेश इति सकृदेवेति लाघवमिति चेत् मैवं एचइक् ह्रस्वसंज्ञायां त्रयपक्षान्यत्रेति चत्वारि पदानि व
त्वारि च एच इग्घ्रस्वादेश इत्यत्र त्रयो पदानि एकत्रैवेत्येव इगित्युक्तौ नुषङ्गेवेति लाघववैपरीत्यात् ननु हेऽच्छेदनेऽस्य हिउपती त्यर्थमितां ह

© Dharmartha Trust J&K. Digitized by eGangotri

सि०कु०

१३

13

स्वस्त्यत्रः परमनुमन्यस्त्यर्थीरवितस्य नव्याधस्येत्यत्र चरणवद्गितस्य स्थानेऽन्यत्वाद्दशावयवानि भवेत्ति तेन यथासंख्यासे ह्रस्वादेशस्त्यत्राङः पृथग्गा ग्रा
नेपि न निस्वारः अनवयवापत्तावपि देशापेक्षयाल्लाघवादिति वेदत्रकेपटः लाघवोपलक्षणापरं भाष्यं परत्वं लचेड्गितस्य पादाने शक्ष्गौ
रवेपि प्रतिपत्तिलाघवान्नपायादिति तदेवं ह्रस्वेनानामाणोन सिद्धे ह्रस्वसंज्ञाविधानं द्वित्रिमात्रयोर्न ह्रस्वसंज्ञेत्यत्र ज्ञापकमिति सिद्धौ ॥
अचश्च ह्रस्वदीर्घप्लुतशब्दैर्यत्राविधानं तत्राच इति विशेषणमुपतिष्ठते तच्छेषं वदपवादपञ्चावपत्रमाषोनिरस्तौ तथा हि अचो स्य
विषयो भवति अचो ह्रस्वदीर्घप्लुता अत्स्यस्य कृताकृतेते श्लेषपक्षः भिन्नवाक्यत्वे तु अचोऽन्त्यात्पूर्वस्योत्सन्नं तस्यैवेति तदपवादपदत्रः आघे
द्वेषवार्तिकं ह्रस्वादिविधिरलोऽन्त्यस्येति चेद् द्विवचनश्रिशमादिप्रभृति ह्रस्वनिगामिदीर्घस्य अह्रस्वामिति वाकू भ्राटस्थाम्यति प्लोम्यति जिघांस
तिजिगांसतिजिगांसति अचोऽन्त्यत्वाभावाद्दीर्घो न स्यादिति तत्र नेत्राच इति वक्तव्यं स्यात् द्वितीयेपि अयंच्छेत्रपुंसकह्रस्वत्वकोत्सार्वधातुकेना
मिदीर्घ व्यतन्त्य प्रतिषेधः अन्यथा सुवाक्कुलं मिघातेषमांस्यत्रासत्रप्युक्तो विधयः प्रसज्येरन् पदन्तु नोपधायाः एव नामि नियमः तदा अन्त्यतेत एम०
न्यते स्यत्र आकेदिति दीर्घः स्यात् पश्चिमास्येव नोपधायाः इति तदा वस्त्रामिति नामीति दीर्घः स्यात् अथापि नियमः ह्रस्वं तथापि मध्ये सुवाक्कुस्य १३

© Dharmartha Trust J&K. Digitized by eGangotri

त्रातिप्रसंगो दुर्वार एव यकारादौ वदंगं तस्य योऽवयवो ऽच् इति व्याख्याने तत्र त्वगमिति नामीति दीर्घः स्यात् अथापि नियम इष्यते तथापि
मिद्यते सुवाक् स्पत्रातिप्रसंगो दुर्वार एव यकारादौ यदंगं तस्य योऽवयवो ऽच् इति व्याख्याने मिपनः इत्यत्रातिप्रसंगोक्तिः अच एव यकारादि
नाविशेषणेन तस्यागादेवमन्यत्रापीति केचित् तस्मात् यदेदोपस्थितिपक्ष एव सिद्धान्तः तथा हि अदेश इव इति षष्ठ्यन्तस्योपस्थितौ विवि
प्रच्छिश्मादिस्वम्नति हनिगामि दीर्घो भवव्यादाय विशेषणं अच इति विशेष्यं तेषां अचो दीर्घ इति कुर्वनो नपुंसकस्य अदेत् अचे
इत्येतत्तन्नपुंसकस्येत्यादेर्विशेषणमिति तदन्तविधिनाच्यते तस्य नपुंसकस्येत्यादिरर्थ इति नातिव्याप्तिः ननु दिव जोत पथिमथ्यृ।
भुक्षामात् त्यदादीनाम इत्यत्रापि अच इत्यस्योपस्थितिः स्यात् मैवं कृत्स्नदीर्घप्लुतशब्दानामत्र स्वरूपमात्रपदार्थकानां विधीयमा
नात्विशेषणानुपपत्तेः स्यादिशब्दैर्विधीयमानस्याच इत्यस्य सपत्नेः नेचविशेष्याणामचामुपस्थित्यर्थं तदुपयोगः अनुदात्तेत्व अनेपदे
नैव तेषामुपस्थापितत्वात् नेत्वेवमत्रैवान्यत्र हरणां क्रियतां ननु पूर्वसूत्रे इति चेत् अत्र वार्त्तिकं अन्यत्र हरणां संयोगान्तस्य लोपे
निवृत्त्यर्थं अन्यथा प्रक्ष्य प्रतस्येत्यत्र माविकस्य संयोगस्यापि कृत्स्वसंज्ञापांत्कु स्यात् निन्तङ्छत्वमित्यत्रेच्चे अत्र समुदायस्य विमा

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ सु॰ ऽत्र यादीर्घसंज्ञायां दीर्घात्परं ताद्धेतिनुष्विकः पक्षस्यादित्यर्थः नचैकमचमाश्रित्य कृतलघुग्रहस्त्र गापि पक्षे भविष्यतीतिवाच्यं दी

१५ र्घलक्षणो न परत्वात्तद्बाधेन ह्रस्व ऊ गाविति पुनरप्रवृत्तेः नापीह पुनःप्रसंगविज्ञानं नित्यविकल्पविध्योर्विरोधात् पूर्वेण परस्य बाधप्रसंगात्

14 पक्षेपूर्वो विधिः परं तद्बाधते तत्रैव कश्चित्तदाश्रयणात् समुदायस्तत्रिधावयवानां पारतन्त्र्येण पृथक्कार्यो नारंभवत्वात्तन्नचान्यग्रहणे

कृते पि वर्णग्रहणे जातिग्रहणात्समुदायस्य दीर्घसंज्ञा दुर्वारैवेति वाच्यं ऊकाल इति विशेषणाद्यत्कैरवोपादानात् जातेः परिमाणा

भावात् व्यक्तिद्वारैव तदाश्रयणात् एकैकवर्णव्यक्तित्वेन जातेः समुदायव्यंग्यत्वाभावादित्येके पठः ॥ ॥ उच्चैरुदात्तः नीचैरनुदात्तः नत्रु

च्चैर्नीचपोरपेक्षिकयोः व्यवस्थित्वात्कथं लक्षणत्वं नचैगात्राणां नियहं नूपञ्चापामो रूक्षत्वरूपं दारुणत्वं कंठस्यासंवृततारूपं खस्याणु

त्वं च उच्चैःकराणि गात्रशैथिल्यरूपोऽन्ववसर्गः स्वरस्निग्धत्वरूपं मृदुत्वं कंठमहत्त्वरूपं दवस्योरुत्वं चेति नीचैःकराणीति वाच्यं महाप्रा

णो हि पुरुषो नीचैरप्युच्चारयन्स्वरेण महान्तं देशं व्याप्नोति अल्पप्राणस्तूच्चैरप्युच्चारयन्नल्पमेवेति दोषतादवस्थ्यात् अत्र वार्तिकं सि एम॰

द्धं तु समानप्रक्रमवचनादिति प्रक्रमं तेवर्णोऽस्मिन्निति प्रक्रमः स्थानं तदयमर्थः तात्वादिस्थानानां ऊर्ध्वाधोभेदेन भागद्वयं ऊर्ध्वभा १५

© Dharmartha Trust J&K. Digitized by eGangotri

गेनोच्चार्यमाणउदात्तः अधोभागेन त्वनुदात्तः अभ्यासस्ते पश्चात्पं स्वरविशेषः षड्जादिवदिति एते च अगामेव गुणानन्तु हलां अनुप
रागान्नु हलाम भवितथोपलब्धिः इषेत्वोर्जेत्वेत्यादौ यथा न चैवं परीत्वं आप्याप धमित्यादौ आकारोदात्तत्वे तिङ् तस्य चानिपाते आकारस्य
हलुपरागं विनाप्युदात्तत्वात् तस्मादन्वयव्यतिरेकाभ्यां हलः एवाच्छ्वरानुविधायिन इति सिद्धं स्वपंगजे तेस्वराः अन्वगभवति व्यंजनमित्यन्व
र्थसंज्ञयाप्येवमिति भाष्यं यद्यपि साहचर्यं न किंचिदस्ति तथापि संप्रदायमात्रादिप निरुक्तिः यद्वा अंजेर्गत्यर्थत्वाद्द्विविधं गच्छतीति अंजपरा
गादिति निर्वचनेनास्य यमिति कैयटः॥ ॥समाहारः स्वरितः॥ यद्यप्यचो नैसमाहारः कार्यकं कन्याइत्यादौ इच्छानिवारकस्याप्यतस्यासं
भवात् अहल्लोप्येत किमोत् मित्यत्वरितं गांगेनुपे इत्यादौ तु गांगश इत्यायाणान्तत्वादित्तोदात्तत्वे अरूपशब्दस्याना रेप्रधानकनीयसी इत्यनु
दात्तादित्वे एकादेशस्य स्वरितो वा नुदात्ते पदादाविति स्वरितत्वे इच्छानिवारकतत्संभवेप्यतस्यागोणत्वात् आदेशस्य स्वरितस्य वर्णान्तर
त्वात् नापि उदात्तत्वानुदात्तत्वयोरेव समाहारो अनुदात्ते पदादाविति स्वरितत्वे इच्छानिवारकतत्संभवेप्यतस्य गौणत्वात् आदेशस्य
स्वरितस्य वर्णान्तरत्वात् नाप्यचोग्राह्यः अचप्रसंगात् तथापि गुणिनोः समाहारानुपपत्तौ गुणयोरस्तदाश्रयणं न चैवं समाहारस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु०
१५
15

संज्ञित्वानुपपत्तिः स्वरितसंज्ञा पाद्योऽपि तयोरेव एव संज्ञित्वेनाक्षेपादिति गाथं उपचारात्समाहारस्वतो च एव संज्ञित्वात् नदैवं त्रैस्वर्ये
णाधीमहे इत्यादि शिष्टव्यवहारविरोधः केश्चिदुदात्तगुणौः केश्चिदनुदात्तगुणौः केश्चिदुभयगुणौ रित्तितदर्थात् स्वरत्रैविध्यपर
त्वाभावात्॥ ॥तस्यादित उदात्तमर्द्धह्रस्वं स्थितं गुणद्वयसमाहारे विभागप्रदर्शनार्थमारंभः ननु ह्रस्वयस्याऽऽत् दीर्घप्लुतस्व
रितयोरयं विभागो न स्यात् कन्या शक्तिके इ शक्तिके इति कन्या राजमनुष्याणामित्यत्र स्वरितः स्वरितमाम्रेडिते ऽसूयेति स्वरितः
प्लुतः मैवं अर्द्धह्रस्वशब्दः प्रमाणे रूढः व्युत्पत्त्यर्थं ह्रस्वस्योपादानं अर्द्धमात्रात्वेनाभिधीयते ततः प्रमेये मात्रप्रत्ययः प्रमाणे लेदे
ति लुक् ततश्चार्द्धह्रस्वदीर्घप्लुतयोरपि तु अर्द्धमात्राविभागसंभवात्र दोष इति भाष्यकैयटयोः स्थितं अत एव येन विधिरिति सूत्रे ह्र
स्वशब्दमनुख्य पावन्सा मात्रा अर्द्ध वर्तमानमंगीकृत्य दीर्घप्लुतयोरुदात्तविभागः कृत इति वृत्तिविवरणकारैरुक्तं अत्र दीक्षितः ह्र
स्वग्रहणमवयुत्यानुवादमात्रं अर्द्धमित्येव विवक्षितं तच्च न समांशरूपं किंतु लेशरूपं तत्र प्रातिशाख्यविशेषानुरोधेन कस्या
चिच्छाखाया समांशः कस्यांचिदर्द्धमात्रेति विशेषः एकश्रुत्यादीनां प्रातिशाख्यानुरोधेनैव व्यवस्थादर्शनात् अच दीर्घस्वरितस

एम०
१५

© Dharmartha Trust J&K. Digitized by eGangotri

मार्द्धस्योदात्तत्वे प्रमाणमाव४ ये राक्षत्रे एकारस्य तनूनपात् शचीपतिमित्यत्र वपद्पाठे ऊदीतोरक्वां दात्ततपाठे कृचे पाद्यमानत्वात् तनून
पाच्छचीपतिशब्दयोरुभेवनस्यत्वादिष्ठु गपदितिपूर्वोत्तरपदयोरनुदात्तत्वे शेषनिपातैः पूर्वपदयोश्चतनूशचीपदयोरंत्यस्य पाणिकं स्वरि
तत्वं प्रातिशाख्येऽत्रं जात्यवदाततथाचांत्योतनूशचीतिपूर्वयोरिति स्वरितोर्द्धस्योदात्तत्वे प्रातिशाख्यमपि एकारस्य समावेशे पूर्वयोः स्वरि
तः स्वरः तस्योदात्ततरोदात्ताद्धं मात्रार्द्धमेव वाऽत्रनुदात्तः परः शेषः स्यदात्तश्रुतिने चेत् उदात्ते चोच्यते किंचित्स्वरितं वा द्द्धरं परं इति स्वारस्यांते
स्वरितलक्षणं पूर्वेतिपदस्योदात्तानुदात्तपरत्वात् तस्य स्वरितस्य स्वांते त्रोदात्तापेक्ष्यपा उदात्ततराद्धमात्रावो ध्येतिकवोध्यार्हत्याधमिप्राप ने
चैवं स्वांते त्रोदात्तस्यनीचस्छा नेत्यादकृदात्तत्वापत्तिः अत्रांतनीचस्यैव स्थानस्यतत्रोणादानात् अर्द्धवेतिदीर्घाभिप्रायं अनेनैवत्र पाणमुप
संग्रहादिदमेवार्द्धवमिति स्वचपितुमेवकारः अर्द्धमात्रापेक्ष्यपाद्मांशस्य वृद्धत्वेन तदुपकोरकत्वाऽन्योऽन्यासाच्च प्रातिशाख्यसमारव्य
पातेच्छा स्वापरत्वे लाभेतच्छास्वापांस्वरितस्य स्वमांशोदात्तपाठाच्च अनुदात्तस्याद्यिः परिशेषसिद्धार्थानवादः स शेषः उदात्तश्रुतिः किमविशे
षणेनेत्याह नचेदित्यादि उदात्तस्वरितपरंहि तापेत्यर्थः शाकल्योप्याह अप्राकृतनित्ययः स्वारः स्वरितोदात्तपूर्वैः उदात्तपार्द्धमस्याथशि

© Dharmartha Trust J&K. Digitized by eGangotri

सि० मु० १६ 16

एवंनिग्रतिकेपितं उदाहरणमुदाहृतं केचित्वेत्याहुः अत्रवदंति नेदंयुक्तं उक्ताकरग्रंथविरोधात् शाखांतरविशेषे तथापाठेपि सर्वशाखासाधारणस्य
स्यतदेकवाक्यतया संकोचानर्हत्वात् लौकिकप्रयोगविशेषवचनाभावे ऽर्द्धमात्रैवोदात्तेत्यत्रतात्पर्यात् उक्तप्रातिशाख्यवचनेन साधकं अर्द्धमा
त्रार्द्धमेववेतिपक्षयोः पाणिनिशाकल्यकृतयोः सामान्यविशेषलक्षणाभ्यां रभिप्रायेणाव्यवस्थितत्वात् एवकारो विशेषलक्षणेनकृतायाः
सामान्यलक्षणाप्राप्तेरनुवादार्थः गणशब्दो व्यवस्थितविकल्पार्थ इति अपि च समांशग्रहणो ऽर्द्धग्रहणावैयर्थ्यं समंस्यादुक्तत्वादितिपे
वसिद्धेः नचार्द्धमात्राया अपिलाभार्थंजतत् उभयसाधारणरूपाभावात् लेशान्तस्यैकरूपाभावात् एकशेषादिकल्पनेपि गौरवात् एतेना
र्द्धह्रस्वग्रहे नार्द्धमात्रा लक्ष्यत इति हरदत्तादिग्रन्था एकमतानि तत्परतया कथंचिन्नेया इति प्रत्युक्तं हरदत्तोक्तस्यैवप्रकृतसूत्रार्थत्वात्
यत्तु आकरे अर्द्धमात्रायामर्द्धह्रस्वशब्दस्य रूढत्वोक्तत्वात् समुदायस्य शक्त्यभावेन लक्षणाया अप्रयोगाच्चाप्रकृता एवेति तत्र अर्द्धमात्रापी स्म० १६
त्रहठावविकैयठोक्तरीत्या तद्वाच्यत्रयर्मिणो लक्षणायैवलाभात् मात्रचूप्रत्ययलोपमज्ञानेनतामपिवोधोदयात् दत्तशासनस्य गुणवचने
ष्वित्यादिवल्लेखनतात्पर्यग्राहकत्वादित्यास्तांविस्तरः प्रकृतमनुसरामः अत्रवार्त्तिकं स्वरितस्यार्द्धह्रस्वोदात्तादोदात्तस्वरितपरस्य

© Dharmartha Trust J&K. Digitized by eGangotri

स्वरितात्कार्यं स्वरितादिति सिद्धमर्थं असार्थः आद्यर्द्धह्रस्वो दात्तादित्याकारश्छेदः इयं नग सञ्ज्ञी उदात्तादनुदात्तस्य स्वरित इत्येतदुत्तरम् अद्यमे पठनीया ते
नः इमं मे गंगे यमुने सरस्वती अत्र मे शब्दात् स्वरितात्परे गंगे इत्यादौ नं आमंत्रितानिघातादनुदात्तानां स्वरितात्संहितायामनुदात्तानामिति वचनादेकश्रु
तिर्भवति अन्यथा उदात्तादनुदात्तस्येति त्रैपादिकस्वरितस्य स्वरितादित्यत्रासिद्धत्वात्स्वरितात्परत्वमनुदात्तानां नास्तीति एकश्रुतिर्न स्यात् न चा
त्रयासिद्धत्वं शंक्यं कार्यमिष्यादोषाद् स्वरिते सावकाशत्वात् स्वरितोदात्तार्थं च तथाहि सुब्रह्मण्योसाधुरिति यत्रत्यपः तित्वात्स्वरितः त
नद्ध्यापिल्लादनुदात्तः एकादेशश्चान्तरतम्यात्स्वरितः तथानुदात्तभागस्याविद्यमानत्वात् ओमित्युदात्तः ओमाङोश्चेत्युदात्तस्वरितयोरेका
देशः स्वरितस्त्व एकादेशान्तरतम्यात् इंद्र आमंत्रितत्वादनुदात्तः सुब्रह्मण्योमिंद्र आगच्छेत्यत्र न सुब्रह्मण्यांस्वरितस्यातः उदात्तः स्यो कारस्य
स्वरितस्योदात्तविधानं सावकाशमिति त्रैपादिकस्वरितस्योदात्तो न स्यात् इंद्र आगच्छेति यथा स्वरितोदात्तार्थः स्वरितार्थं इंद्रागच्छ हरिव
आगच्छ आशह उदात्तः गच्छेति शेषनिघातादनुदात्तः उदात्तादनुदात्तस्येति स्वरितः तस्यासिद्धत्वादेकः सत्वे णोदात्तत्वेन स्यात् स्वरितपर
सत्रेतरार्थं च माणावकं जटिलकाध्यापयकन्यः न्यधीचेति पूर्वपदस्यैकश्रुतिः स्वरः ततश्चोदात्तस्वरितयोर्यणः सकारः स्वरितः तस्यासिद्धत्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु० सन्नतरार्थं च माणवकजटिलकाध्यापककम् मध्वीचेति पूर्वपरप्रकृतिस्वरः तत्र उदात्तस्वरितयोर्यण इत्यकारः स्वरितः तस्यासिद्धत्वा
१८ त् उदात्तस्वरितपरस्य सन्नतर इति पूर्वस्यानुदात्ततरो न स्यात् न चाश्रयासिद्धत्वं माणवकजटिलकाभिरूपक इत्यत्र सावकाशत्वात् नित्यस्व
रितमित्यस्यासिद्धत्वात् तस्मान्न च सन्नतरशास्त्रं तेन पठनीयमिति सिद्धं तच्च स्वरूपकृते च ज्ञापितं तदुक्तं देवब्रह्मणोरनुदात्तेव च नं ज्ञापकं स्वरितादिति सिद्ध
17 त्वस्येरि अन्यथा स्वरितस्यासिद्धत्वादनुदात्तत्वमस्त्येवेति अनुदात्तविधानमनर्थकं स्यात् न हि स्वरितस्य सिद्धत्वमनेन ज्ञाप्यते स्वरितस्य प
उदात्तस्वस्मात्परस्यानुदात्तस्य स्वरितापत्तेरिति भाष्यवार्त्तिकयोः स्थितं अत्र दीक्षिताः स्वरितस्य तूदात्ते इति प्रकरणोत्कर्षे ज्ञापक न च भा
ष्यकैयटादिरीत्या सुब्रह्मण्योमित्यत्र तदवकाशः तत्र एकादेश उदात्तेनोदात्त इत्यस्य प्रवृत्तेरावश्यकत्वात् न च तत्रानुदात्तस्येत्यनुवृत्तेरिति
कृतोक्तत्वात् उदात्तस्वरितयोरेकादेशेन तत्प्रवृत्तिरिति वाच्यं तदनुवृत्तौ मानाभावात् धावरमित्यत्र वद्धत्तेरुदात्तस्यैव प्रवृत्तमानत्वात् धा
शब्दस्य च स्वरितत्वात् तैत्तिरीयाणामपि पाठ एवैवमेतयाप्यापपत्तीत्यम्बाद् मन्त्रे षड्द्वितीयासरस्योदात्तत्वाच्च अत एव वच्काचपाति एम०
शाखे उदात्तवतोकीमावच उदात्तं संघ्यमहणं अनुदात्तोदये पुनः स्वरितं स्वरितोपधे इति श्लोके उक्तेरर्धद्वये एवानुदात्तपदं प्रयुक्तं पूर्वान्वयम ९

© Dharmartha Trust J&K. Digitized by eGangotri

वारणाय च पुनः परं प्रयुक्तं शौनकीये स्वराष्टकेपि एकादिष्वनुदात्तेन तं तमेव नयेत् स्वरं इत्युक्तं एकादेशे प्रतियोगित्वेनानुदात्तस्यानुपादाना
दित्याहुः तत्र शाखाविशेषे तथापाठस्य प्राप्तिशाखाविशेषविधिनैव सिद्धत्वात् तदनुरोधेन सर्वशाखादर्शिभाष्यकारादिव्याख्यानस्योदाहृतं बाधयि
तुमशक्यत्वात् ॥ ॥ एकश्रुति दूरात्संबुद्धौ ॥ दूरात्संबोधने वाक्यमेकश्रुति स्यात् आगच्छ भो माणवक पक्षे माणवकशब्दस्य टेः प्लुत उदात्तः
एकश्रुति स्तुतानामवयवभेदेनावकोसमुज्झितानां दूरात्संबोधनं द्योत्यते संबुद्धिपदं संबोधनपरं एकवचनेपरत्वे देवा अत्रा सलणादित्यादावव्याप्तेः
तदुक्तं उभयत्र गतिरिह शास्त्रे भवति केचिदत्र त्रिप्रस्यापि दूरणामित्यर्थः एकवचनस्य दूरादिविशेषणानुपपत्तेः संबोधनस्य तु क्रियारूप
त्वादुपादानतया तत्संभवात् एकश्रुतिश्च नोदात्ता उच्चैस्तरां वा वषट्कार इत्युदात्तविधानात् अन्यथा यज्ञकर्मणीत्येकश्रुत्यैव सिद्धेः नाप्य
नुदात्ता उदात्तस्वरितपरस्य सन्नतर इति अनुदात्तत्वविधानात् एकश्रुत्यनुदात्त्यैव सिद्धावनुदात्तविधानमनर्थकं स्यात् तस्मादीरोदकवदु
दात्तानुदात्तयोर्भेदतिरोधानमेकश्रुतिरित्यर्थः सिद्धः अत्रैव प्रवपाव्यवहारे वैदिकानां स्वरितेन तु विभागेन तयोरुपलब्धिः अन्ये तु व्याव
क्षते उभयत्रापि तरनिर्देशस्तत्र सोमस्याग्ने वीहीवौषडित्यत्र यज्ञकर्मणीत्येकश्रुतिर्विहिता तदपेक्षया वौषट्शब्दस्योदात्ततरत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰सु॰

विधीयते तच्चैकश्रुते रुदात्तानुदात्तं विनानुपपन्नं उत्कर्षस्य समप्रतियोगिकत्वात् एवं सन्नतरस्यत्रापि तथा च सप्त स्वराः उदात्त उदात्ततरो ऽनुदात्तो
१८ ऽनुदात्ततरः स्वरितः स्वरितोदात्तः स्वरित एवानुदात्तेनोपरक्त एकश्रुतिः कस्यचित्तु स्वरितस्योदात्तभागो नानुदात्तेनानुरज्यत इति पृथक् स्वरितानिर्देश इ
ति सिद्धं॥ ॥यज्ञकर्मण्यजपन्यूङ्खसामसु॥ मन्त्रो यज्ञकर्मण्येकश्रुतिः स्यात् जपादीन्वर्जयित्वा अग्निर्मूर्धा दिवः यज्ञेति किं स्वाध्यायकाले त्रैस्वर्यमेव
18 यथा स्यात् अजपेति किं समाग्ने वर्चो विहवेष्वस्तु जपो नामोपांशुप्रयोगः यथा जले निमग्नस्य न्यूङ्खाः षोडश ओंकाराः तेषु प्रथमसप्तमत्रयोदशास्त्रय
उदात्तास्त्रिमात्राः इतरे त्रयोदशानुदात्ता अर्धौकाराः एवं बाष्कलायनेनोक्तमुदाहृतं चैतत्प्रसादकारैः गीतिषु सामाख्येति जैमिनिसूत्रं अजपेति य
पुदाहृतं तद्दशमं त्रे इदमेकश्रुत्यं अत एव इदमत्र शङ्के ऊह्यमाने नैतत्सम्यक् त्रिस्वरितिप्रसादशायामप्रपञ्चितं॥ ॥उच्चैस्तरां वा वषट्कारः॥ यज्ञकर्मणि वौ
षट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा सोमस्याग्ने वीहीऽ३ वौषट् वषट्शब्दोपादानं वैचित्र्यार्थं वौषट्शब्दस्यैव विवक्षितत्वादिति संप्रदायः एतन्निर्देशादे
व वर्णनिर्देशाभावेऽपि कार्यप्रत्ययः तेन स्वाहाकारो हन्तकार इत्यादि सिद्धं॥ ॥विभाषा छन्दसि॥ छन्दसि एकश्रुतिर्वा व्यवस्थया विकल्पः यथा बह्वृचा स॰
नां संहितायां त्रैस्वर्यं ब्राह्मणे त्वेकश्रुतिरित्यादि विकल्पस्य प्रकृतत्वेऽपि पुनः कर्मणीत्यस्य निवृत्तिसूचनार्थं पुनर्विभाषाग्रहणं तेन यज्ञकर्मण्येव नित्या १८

© Dharmartha Trust J&K. Digitized by eGangotri

पा वैकल्पिकत्वश्चैकश्रुतेर्विरोधादिधातुमशक्यत्वात्सामर्थ्याद्देवयज्ञकर्मणीत्यस्य निवृत्तिसंभवात्पुनर्विभाषाग्रहणं व्यर्थमिति चेन्न अजपेत्यादिपर्यु
दासान्नित्यैकश्रुतेर्मन्त्रविषयकत्वे वैकल्पिकत्वाक्षात्रालक्षणापत्त्वमिति व्यवस्थाऽसंभवात् प्रतिषेधपक्षेऽपि नित्यैकश्रुतेरेव दोषादिविषयकत्वे वैकल्पि
कत्वात्क्वच्छंदोविषयत्वमिति संभवान्निवृत्त्यर्थं तथा सार्थकत्वात् अत्र व्याचक्षते तंत्रेण हृत्पाठगा छंदसीति न श्लेषामन्दाशायामायैद्दितिको विक
ल्पः; हांडिना यज्ञादिसूत्रे ऐश्वाकस्य स्वरभेदार्थं पृथक्पाठेन मित्यक्तो ऐकश्रुत्यनिर्देशात्सिद्धं एकश्रुतिर्हि स्वरसर्वनाम यथा नपुंसकं
लिंगसर्वनामेति भाष्योक्तेः अत एवविकृतस्वरकसमासधपस्यैकश्रुत्यासंग्रहणादभिप्रक्रानां श्लेषकाव्यनिर्माणं संगच्छते तदुक्तं तेश्वेतो
धावत्यलंबुसानां याते ति भाष्यं वा तत एवं दशत्रुपादे वे स्त्री हि स्वरेण दोषप्रवृत्तिरुक्तोपस्पशायां वेदवल्लोके स्वरो न विशेषाध्यवसायहेतु
रिति काव्यप्रकाशस्यत्वेकश्रुत्यापाठादित्याशयः नवैवेकल्पोन्मममिति प्रक्रम्य विभाषाभाषायमिपुक्तेवैयर्थ्यं त्रेस्वपैकश्रुत्यमपाठिको
नुदात्तत्वाभावार्थत्वात् वेति प्रकृतेविभाषाग्रहणात्सूत्रकृतापि तन्त्रादेशमिमतत्वात् स्वरविधौ छंदोधिकाराभावाच्चेति दिक् तत्र विस्तरः॥ ॥
नसुब्रह्मण्यायां स्वरितस्य तूदात्तः सुब्रह्मण्याख्ये निगदे पूर्वेण प्राप्ता एकश्रुतिर्न भवति किंतु वचनान्तरविहितस्य स्वरितस्योदात्तः स्यात्

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु० ये हरिणो इंद्रस्या गच्छ ॐकारस्योदात्तत्वमाख्यातं ॐमाङ्यादान इति प्लुतोदात्तत्वं तु नास्ति तस्यापरोक्षमेव विषयत्वादिति संप्रदायः इंद्रशब्द
१९ आमंत्रिताद्युदात्तः शेषनिघातेनाकारोऽनुदात्तः उदात्तादनुदात्तस्येति तस्य स्वरितः तस्यानेन उदात्तः आशब्द उदात्तः गच्छेत्यस्य तिङ्ङतिङः
19 इति निघातः उदात्तादिति गकाराकारस्य स्वरितः तस्याप्युदात्तः तथा च छकारमिश्रा आपाश्चात्यार उदात्ताः नोदात्तादिति छकारस्याप्यनुदात्तत्वा
पत्तिः तदुत्तरमेतत्प्रकरणापादस्य पूर्वमुक्तत्वात् स्वरितोदात्तस्येति द्विमात्रम् हरिव आ गच्छेत्यत्र आमंत्रिताद्युदात्तः इकारस्य शेषनिघातः तस्य स्वरि
तः तस्योदात्तत्वं इति हरिव इत्यत्र वाकारोदात्तत्वं तस्यानुदात्तः आगच्छेत्यपि पूर्ववत् आ गच्छ मघवन्नित्यत्र आमंत्रितस्येति मघवच्छब्दोऽनुदात्तः
मेधातिथेरिति षष्ठ्यंतस्य मेधात्यामंत्रिते परांगवद्भावात् आमंत्रितस्वरेण मे इत्युदात्तः धा इत्यस्योक्तरीत्या स्वरितस्यानेनोदात्तः मेधा इति द्वयमुदा
त्तं इतरदनुदात्तं एवं वृषणाश्वस्य मेने गौरावस्कंदिन् अहल्यायै जार इत्यादिषु परांगवद्भावादियोज्यं कौशिकब्राह्मण गौतमब्रुवाण इत्यत्रापि द्वौ आद्युदात्तौ
वन्ये नुदात्ताः न वर्तते पस्याप्युदात्तादनुदात्तस्येति स्वरितत्वादन्ये नोदात्तत्वापत्तिः एवं परेषामपीति वाच्यं स्वरितग्रहणसामर्थ्यात् सर्वेषामनु स्व०
दात्तत्वे इष्टे न त्वपदादौ सुब्रह्मण्याया मुदात्तः इत्येव द्रूयाते तस्मात् मघग्रहणसामर्थ्यान्न सर्वेषामुदात्तत्वं [illegible]: सुत्यामागच्छ मघवन् [illegible] इति नि १९

पातस्वेरणं ततो दात्तः सुत्याशब्दः संज्ञापांसमञ्जनिपदनिपतमनविदधुजेश्चीरूः ऋजिराणइति सुनोतेः कथं स्तयत्रो दात्तानुवर्त्तेरं ततो दात्तः श्रोत्रनिघा
तेन सुइत्यनुदात्तः उदात्तस्वरितपरस्येत्यनुदात्ततरः आगच्छेति जाग्रदात्तौ परो नुदात्त इति पूर्ववत् स्वहे सुत्यां अहे सुत्याम् घ्यस्इति जंततादं ततो दात्तं
तथा च सामश्रेष्ठलक्षणं नैष्माउ तरेति व ब्रुत्रसु ब्रह्मण्यः सुब्रह्मण्या याञ्चा पाति सुब्रह्मण्यां सुब्रह्मण्यो सुब्रह्मण्येमिति त्रिःप्रमिवत्रिराह त्रिवृत्या हि देवाइंद्रा
गच्छेति यदाहेंद्रागच्छेत्येतद्वा अस्य रूपं संज्ञामतेनैवेनं त्रिरापति हरिव आगच्छेति पूर्वपक्षापरपक्षौ वा इंद्रस्य हरीताभ्यां हीदं सर्वं हरतीति मेधाति
थे मेषेति मेधातिथिं ह काण्वायनं मेषो भूत्वा जहार वृषणश्वस्य मेनेति वृषणश्वस्य ह मेनस्य मेनका स समंद्द हितास तां हेदस्य क मे गौरावस्कंदिन्निति
गौरो मृगो ह भूत्वाव स्कंधारण्याद्राजानं पिबन्य ह ल्यायै जारेत्य हल्यायाह मेत्रेय्या जार आसकौशिक ब्राह्मणेति कौशिको ह स्मैनं ब्राह्मण उपन्येति
गौतम ब्रुवाणेति देवासुरा ह संयत्ता आसुस्तानंतरेण गौतम अवाश्रामतामिंद्रस्यो वाचे ह नो भवान् स्पशश्चरन्निति ना ह मेत्सहस्यपाह भवतो ह
वेणाचराणीति यथामन्यस इति स पत्नीको नमो ब्रुवाणश्चचार गौतम हैव एवाभदेतद्दाह गौतमो सीत्यदेसुत्यामागच्छ मघवन्निति तद्यथा ह
लोद्रूपाहितरेवः पश्वास्मिन्नदागच्छतेत्येव मेवैतद्देवेभ्यः सुत्यां प्राह देवा ब्राह्मणा इति देवा है वदेवाअथ हैते मनुष्य देवा मे ब्राह्मणाः शुश्रुवांसो

© Dharmartha Trust J&K. Digitized by eGangotri

सि०मु०
२०
20

न्ब्राह्मणास्ते मनुष्यदेवा आहुतय एव देवानां दक्षिणा मनुष्यदेवानामाहुतिभिर्ह देवान्प्रीणाति दक्षिणाभिर्मनुष्यदेवाञ्छुश्रुवुषोऽनूचानान्ब्राह्म
णान्प्रीणातीति असावित्यन्तः । वाचनिकमिदं अथमान्तस्यान्तउदात्तः । गार्ग्यौ यजते वात्स्यौ यजते जित्वादाद्युदात्तत्वं प्राप्तं तथा च व्याख्यायां पाणिसू
त्रे अर्थो निर्वचनेन समर्थ्यन्ते अर्थो निरुच्यते वोध्यते प्राधान्येन प्रतिपाद्यते नेनेत्यर्थो निर्वचनं पदमिति प्रावृत् पदमित्येवत नोक्तं समासे पूर्वपदाना
मन्तोदात्तत्वमाभूदिति व्याख्यातारः । यजते इत्यस्य निहतस्य शत्रादिति स्वरितत्वे उदात्तः । अमुष्येत्यन्तः षष्ठ्यन्तोपलक्षणमिदं दाक्षेः पिता यजते पू
र्ववत् स्यान्तस्योपोत्तमं च अदन्तस्य षष्ठ्यन्तस्य उपोत्तमदात्तत्वात् गार्ग्यस्य पिता यजते वात्स्यस्य पिता यजते वा नामधेयस्य स्यान्तस्योपोत्तमं
वा उदात्तं स्यात् देवदत्तस्यादेव देवदत्तस्य पिता यजते जनिष्ठमाणनेमित्यत्र प्रत्ययस्वरेणाऽस्य प्राप्त उदात्तः । तास्यनुदात्तेदिति लसार्वधातुकस्वरेण शा
नजनुदात्ते उदात्तादिति स्वरितः । यमाइत्युदात्तौ अन्यच्छेषनिघातेनानुदात्तं पितापितामह इत्यत्र तु पितामहप्रपितामहयोरसावित्यन्तोदात्ते उ
दात्तादिति स्वरितत्वे प्रकृतसूत्रेणाऽपि गशश्योरेवोदात्तत्वे न तु तत्परतोऽपि ॥ ॥देवब्रह्मणोरनुदात्तः ॥ अत्र वार्त्तिकं देवब्रह्मणोरनुदात्तत्वमेके इति रा०
देवा ब्रह्माण आगच्छत अयमर्थः देवा ब्रह्माण इति पदयोर्वैयधिकरण्यपक्षे इति पक्षे दर्शस्यामन्त्रितस्याविद्यमानवन्न्यायादुभयोरपि आमन्त्रिताद्यु २०

दात्तत्वे शेषनिघाते स्वरितत्वे च कृते ऽनुदात्तविधिरर्थकात् यदि तु तयोः समानाधिकरण्यं नुदात्ताविभक्तिं विशेषवचने बहुवचनमिति पक्षे विद्यमान
त्वादामंत्रितस्येति निघातेनैव सिद्धत्वात्प्रयोजनाभावात् ॥ ॥स्वरितात्संहितायामनुदात्तानां स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात्
इमं मे गंगे यमुने सरस्वति इमामित्यत्रोदात्तं मेइत्यनुदात्तं अनुदात्तं सर्वमित्यधिकारात् उदात्तादनुदात्तस्येति स्वरितः ततः परे गंगे इत्यादीनामेकश्रु
तिः संहितायां किं पदपाठे आमंत्रितनिघातेनानुदात्तमेव यथा स्यात् स्यादेतत् अनुदात्तानामिति बहुत्वं विवक्षितं न वा नाद्यः आग्निवेश्यः पच
तीत्यत्र हित्वे कत्वयोरव्याप्तेः आग्निवेश्य शब्दो हि गर्गादियञन्तत्वादाद्युदात्तः शेषनिघाते द्वितीय उदात्तादिति स्वरितः वैश्य इति वर्णद्वयमनुदात्तं पच
तीत्यत्र धात्वनुदात्तः शप्तिपौ पित्त्वादनुदात्तौ शवकारः स्वरितः ततः परस्य एकस्यानुदात्तस्य एकश्रुतिर्न स्यात् नांत्यः इमं मे गंगे यमुने सरस्वतीत्यत्र मेश
ब्दस्य स्वरितत्वात्ततः परस्यैकस्यैवैकश्रुतिः स्यात् न यमुने इत्यादीनां व्यवहितत्वात् तस्मादित्युत्तरस्येति वचनात् अत्र भाष्यं वचनेनत्रयांतानामनुदात्त
पदानामेकशेषोयमिति सरूपसूत्रारंभपक्षेपि इदं ज्ञातिपदेनुजानामाख्यायामितिबहुवचनं ततश्चैकद्विबहुषु स्वरितात्परस्याजातेरानंतर्येणोपलं
भात्सर्वेषामेकश्रुत्यसिद्धिः नन्वाद्ये पक्षे अनेकानामेवकार्यं स्यात्सरूपविवक्षायामेकशेषविधानात्समुदितानामेवकार्यमन्यथादित्सिचेत्र मिदं शेस

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु०
२१
21

हविर्वत्स्याद्यामपि श्रुत्येकं कार्यं प्रवृत्तेर्देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामितिवत्॥ ॥उदात्तस्वरितपरस्य सन्नतरः उदात्तः स्वरितो वा परो य
स्मात्तस्यानुदात्तस्यानुदात्ततरः स्यात् सरस्वति शुतुद्रिव्यवक्षपत्स्वः इतिहतिकारादयः केचित्तु एकश्रुतिस्वरस्यानुदात्ततरः स्यादित्येवार्थः अ
न्यथा एकश्रुतिहृणादिति सूत्रगतभाष्यविरोधात् किंच अस्यासिद्धत्वात्स्वरितकारस्यापि पूर्वैरेकश्रुतिः स्यात् न्यायंतदपवादः अग्निकन्याः
यादौ सावकाशत्वात् न चैतन्मनेद्यन्नेति योगविभागादासिद्धत्वमिति हरदत्तादिरीत्या निर्वाहः तदर्थयोगविभागस्य भाष्यादावनुक्तेः अन्यथा
शास्त्रांतपाठकल्पनस्यापि वैयर्थ्यात् एकश्रुतेरिव स्वरितस्यापि परत्वाद्बाधोपपत्तौ नोदात्तस्वरितोदयमिति सूत्रवैयर्थ्याच्चेतिप्राहुः॥ ॥अपृक्त ए
काल्प्रत्ययः एकोऽल्प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् प्रदेशाः सुतिस्यपृक्तं हल्ङ्यादयः स्यादेतत् एकहलित्येव वक्तव्यं अपृक्तं हलित्यत्र हल्प
दपरित्यागे लाघवात् अल्ग्रहणोऽनुविभेदस्यादेणलोलोपवारणापत्तदावश्यकत्वात् मैवं पूर्वनिलुगशिरोजोरितिपाठपरित्यागे गौरवात् दृल्ग्रहणे
त् अपृक्तस्येत्येवतत्रैवोक्तत्वात् न चैवं फलाहतेरपत्यं फालाहतः फालाहतेर्मिमताभ्यामिति णप्रत्ययस्यापि प्रसंगापत्तिः अण एवालेकालि — एम०
घोणविधानानर्थक्यापत्तेः तदारणात् न च पाञ्चिमोऽश्वेतिप्फग्बाधनार्थतया तत्सार्थक्यं पैलादिपाठकल्पनापिकोवारयितुं शक्यत्वात् यथान्या — २१

© Dharmartha Trust J&K. Digitized by eGangotri

सेऽपृक्तसंज्ञायां अल्ग्रहणं हल्ङ्याब्भ्यादिसूत्रे द्वितीयहल्ग्रहणं अणोऽजो वित्यत्राऽपृक्तग्रहणं चेति त्रयं उक्तरीत्याथापृक्तसंज्ञायां हल्ग्रहणं अ
णोऽभोरित्यत्र — पदयोर्ग्रहणं चेति पदत्रयमेवेति न लाघवं एवं च तथाप्येकग्रहणमास्तु न च दर्विजीग विरित्यादावतिप्रसंगः अलेव
यः प्रत्यय इति व्याख्यानात् अन्यथा त्वद्वैयर्थ्यात् अलं तस्य तत्पर्थे केवलस्याद्यंतवद्भावेन तथात्वाश्रयणे व्याकृत्यभावात् न वैवं हल्ग्रहणोऽपि
समानमिति वाच्यं अजंतव्यावृत्यानतदंतविधेश्चरितार्थत्वापत्तेः तस्मादेकग्रहणं वर्णग्रहणे जातिग्रहणमिति ज्ञापनार्थमिति भाष्यं
निपांतएकाजित्यत्र ज्ञापितस्यापि पुनर्ज्ञापनं मंदबुद्ध्यनुग्रहार्थमिति कैयटः॥ ॥तत्पुरुषः समानाधिकरणः कर्मधारयः सामानाधिकरण्यं प
देयोः शाब्दमार्थं च आद्यं यथा नीलमुत्पलमिति पदद्वयस्य समानविभक्तिकत्वात् द्वितीयमपि तत्रैव तदर्थयोरभेदेन विशेषणविशेष्यभा
वात् न त्वाद्यं वाचितसाधारणं मा त्वा वृध्नेत्यादिदर्शनात् द्वितीयं तु अबाधितमात्रवृत्तीति विवेकः शब्दानुशासनमस्ताबादायमेवात्र निविष्टं
कांचनमयवद्भिमानित्यादिप्रयोगदर्शनात् वृत्तिपदयोरेकविभक्तिकयोर्यस्तत्पुरुषः स कर्मधारयसंज्ञः स्यात् तत्पुरुषप्रकरणस्थत्वेन त
दारंभसक्तकर्मधारयसंज्ञायास्तत्पुरुषसंज्ञाबाधकत्वप्राप्तेरिति तत्रैकासंज्ञाधिकारात् नीलं च तदुत्पलं च नीलोत्पलं निष्कागावो

© Dharmartha Trust J&K. Digitized by eGangotri

सि०कौ० पस्येत्यादिबहुव्रीहेरपि समानाधिकरणाव्यभिचारवारणाय तत्पुरुष इति राजपुरुष इत्यादिवारणाय समानाधिकरण इति नञ्
२१ तत्पुरुषस्य समुदायस्यैकत्वात्सामानाधिकरण्यानुपपत्तिः तस्य भेदनिबन्धनत्वादिति वाच्यं तत्पुरुषपदस्य तद्घटकपदलक्षकत्वात् ननु
22 मुख्यतत्पुरुषस्यापि पदान्तरसामानाधिकरण्यं संभवति राजपुरुषः शोभन इत्यादौ तत्र चरितार्थत्वात्कुतो लक्षणा अत्रैकपदं तत्पुरुषस्य प
दान्तरेण सामानाधिकरण्यं बहिरंगं वृत्तिपदानां तु तदन्तरंगमिति नचैवमप्येकपदानामेव कर्मधारयसंज्ञापत्तिः एकाज्द्विर्वचनन्यायेन पदसमु
दायस्यैवैकसंज्ञाविधानात्॥ ॥प्रथमानिर्दिष्टं समास उपसर्जनं॥ समासविधौ प्रथमान्तपदं उक्तसंज्ञं कष्टं श्रितः कष्टश्रितः कष्टादिशब्दानां
प्रथमान्तत्वाभावेपि द्वितीया श्रितेत्यादौ तत्समर्थकद्वितीयादिपदानां प्रथमान्तत्वात् तथाच समासपदं तद्विधायकशास्त्रपरमिति फलितं स
मासघटकपदापेक्षया समासविधेर्लघुत्वात्तत्परत्वस्यैव न्याय्यत्वात् स्यादेतत् निर्देशापेक्षया समासस्याधारत्वादेकत्र प्रथमानिर्दिष्टस्य
सर्वत्रोपसर्जनसंज्ञा स्यात् तदुक्तं यस्य विधौ प्रथमानिर्देशस्ततोन्यत्रोपसर्जनसंज्ञाप्रसंग इति ततश्च राजकुमारीं श्रित इत्यत्र श्रितादिसमा ल०
से कुमारीशब्दस्य प्रथमानिर्दिष्टत्वादुक्तसंज्ञायामुपसर्जनत्वनिमित्तो ह्रस्वः एवं निपातनश्च पूर्वपदे षष्ठीतत्पुरुषेपि स्यात् अत्र वार्त्तिकं सिद्धं २२

© Dharmartha Trust J&K. Digitized by eGangotri

तुयस्य विधौ तं प्रतीति वचनादिति यस्मिन्नित्यादेः समासविधौ प्रथमानिर्दिष्टं तं प्रत्येवोपसर्जनसंज्ञेत्यर्थात् उपसर्जनमित्यस्यान्वर्थसंज्ञायां यस्य
तियोगिकं यस्याप्रधानत्वं तत्प्रतियोगिकैवोक्तसंज्ञेति लाभात् नन्वेवं अर्द्धपिप्पली पुरुषव्याघ्र इत्यादौ पूर्वपदार्थप्रधानेऽर्द्धादिशब्दानां
उक्तसंज्ञा न स्यात् मैवं अर्थसंभवे सत्येवान्वर्थसंज्ञानां प्रवृत्तिनिमित्तमपेक्ष्य प्रवृत्तेः अन्यत्र तु तत्तन्निरपेक्ष्यैव विधानसामर्थ्यादत एव स्वादीनां
कर्मप्रवचनीयसंज्ञे विवक्ष्यते एतेन राज्ञः पुरुष इत्यादिकमपि व्याख्यातं भाष्ये तु परिहारान्तरमप्युक्तं पूर्वनिपातप्रकरणे हि नवामिति निषेधादर्शना
दिति पूर्वनिपातप्रसक्त्या योक्तं षष्ठ्यन्तयोः समासेऽर्थभेदादप्रधानस्यापूर्वनिपात इति वाक्यसमासयोरेकार्थत्वाद्राज्ञ एव पूर्वनिपातो न पुरुषस्य
अन्यथार्थभेदप्रसंगात् न च राज्ञः कुमार्याश्चोपसर्जनत्वापत्तेः पुनर्ह्रस्वभावादिष्टापत्तेः वाच्यते हि परवल्लिङ्गं शब्दशक्त्या विति यथैव
तत्रैव वक्ष्यमाणीयं तथा चान्वर्थसंज्ञायामेव तात्पर्यं ॥ ॥ एकविभक्ति चापूर्वनिपाते समासे यन्नियतविभक्तिकं तदप्युक्तसंज्ञं न तु तस्य पू
र्वनिपातः तत्र प्रयोगव्यक्तौ सर्वस्याप्येकविभक्तित्वात् सामर्थ्याद्यस्य पर्यायेणापि न सर्वविभक्तित्वं तस्यैव संज्ञा निः कौशाम्बिरित्युक्ते हि
कौशाम्बीशब्दो निःक्रमणक्रियापेक्षया उपादानशक्तिसंबन्धात् पञ्चम्यन्त एव क्रियोत्पत्त्यपेक्षया शक्त्यन्तरानावेशात् स्यादेतत् त्रिता

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु० दिसमासे द्वितीयाद्यंतानां कृत्स्नादिशब्दानामप्यनेन पूर्वनिपातनिषेधः स्यात् पूर्वसूत्रस्य नीलोत्पलादिसमानाधिकरणसमासे सावकाशत्वात्
२३ मैवं अत्र पर्युदासाश्रयणात् पूर्वेणात्र सिद्धेः यद्वा एकविभक्ती त्यनेन विहितोपसर्जनसंज्ञानिबंधनस्यैव पूर्वनिपातस्य प्रतिषेधात् अनंत
23 रस्य विधिर्वा भवति प्रतिषेधो वेति न्यायात् एकविभक्तावषष्ठ्यंतवचनं इह माभूत् अर्द्धंपिप्पल्या अर्द्धपिप्पली एकदेशिसमासमात्रविषयकस्यापं
निषेधस्येन पंचानां कुमारीणां समाहारः पंचकुमारि इत्यादौ उपसर्जनत्वमेवेति द्वितीये विस्तरः प्रयोजनं द्विगुप्राप्तापन्नालंपूर्वोपसर्गक्रांताद्य
र्थे क्रमेणोदाहरणं पंचभिर्गोभिः क्रीतः पंचगुः प्राप्तो जीविकां प्राप्तजीविकः आपन्नो जीविकामापन्नजीविकः अलंकुमार्यै अलंकुमारिः निःक्रां
तः कौशांब्या निःकौशांबिः ॥ ॥ इति श्रीसिद्धांतसुधानिधौ प्रथमाध्यायस्य द्वितीये पादे प्रथममाह्निकं ॥ ॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं ॥
धातुप्रत्ययभिन्नमर्थवच्छब्दरूपं प्रातिपदिकसंज्ञं स्यात् महासंज्ञाकरणं कोधातुः कः प्रत्ययः किं प्रातिपदिकमित्यार्थवर्णाकृत्वनुरोधात् अर्थपद
मभिधेयपरं संज्ञिविशेषणलाभार्थमिदं तदुक्तं अर्थवदिति व्यपदेशार्थं नचाधातुरित्यादिपर्युदासात् द्विःत्रस्यार्थवत एव लाभः धर्मात रमणके सादृश्यव एम०
तो वारणीयत्वात् तेन वर्णेषु प्रत्येकं न व्यभिचारः वर्णानांच मा भूदिति पाठे दशदाडिमाद्यनर्थकपदे समुदायस्य वकारेणासमुच्चयः स्यादेतत् अ २३

© Dharmartha Trust J&K. Digitized by eGangotri

स्कवर्णानां संज्ञा नच स्वादेरापत्तिः एकवाक्यतया संख्याकर्मादिषु तद्व्यविधानात् मैवं अविशेषेण स्वादीनामुत्पत्तेः ततोर्थनियमः कृतार्थापेक्षो वा
ऽत्र पनियम इति अथ पादिवत्सु पादुर्वर्णत्वात् ततश्च धनं वनमित्यादौ समुदायस्येव पृथक् प्रातिपदिकसंज्ञा पांतरं तदर्थवाद्विभक्तिलोपेपि न लोपापु
त्तिः नचाधातुरिति निषेधः प्रत्येकमादिभक्तेरपापतनात् तत्र च धातुत्वाभावात् अर्थवद्ग्रहणात् परिभाषया पाश्चविशिष्टरूपोपादानविषयत्वात् माहत्ये
ठत्वादिवत् यकोर्कं संघातस्यैकार्थ्यात् सुबभावो वर्णादिति नेह वर्णानामर्थवत्त्वं पक्षे तं त्रैलोक्यैव विभक्त्यासमुदायावयवार्थयोगतेकत्वप्रतीतिसिद्धेः
अनर्थकस्य तु संज्ञायां प्रकाशनीपार्थविरहात् अलोकवर्णादपि स्यात् अन्यद्विचारितं पस्पशायां ननु सुपो धातुप्रातिपदिकयोरित्यत्र धातुग्रहणा
पार्थक्येन धातोः प्रातिपदिकसंज्ञा विरहो ज्ञापयिष्यते अन्यथा पुत्रीयतीत्यादौ प्रातिपदिकाद्धातोरेव लुक्सिद्धेः तेनाहरहं व्यत्रमित्यादौ नवनलोपप
त्तिरित्यधातुग्रहणं व्यर्थमेव तत्र अप्रत्यय इति प्रातिपदिकसंज्ञानिषेधात् इदं च तयाधातुग्रहणोपपत्तेः न च प्रत्ययलक्षणेनाप्रत्यय इति संज्ञा विषे
धः नङिसंबुद्ध्योरित्यनेन नलोपे कार्ये प्रत्ययलक्षणमाश्रित्योक्तः पयुदासो न पर्यवर्जितः इति ज्ञापितत्वात् अप्रत्यय इति किं कांडकुमुद् अत्र विभ
क्तं तस्य संज्ञायां हृस्वो नपुंसके प्रातिपदिकस्येति मा भूत् अत्रेमाबोध्य छिद्रमिदं हं तो हावमानुरिति विधेया प्रातिपदिकं संज्ञा विधायकेत्वे

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु०
२४
24

नन्वङ्ग्रहणस्य चरितार्थत्वेपि तद्धितग्रहणं नियमार्थं भविष्यति एतदंतस्यैव प्रत्ययांतस्योक्तसंज्ञेति स्यादेतत् पदानां प्रत्येकं प्रत्ययांतत्वेपि वाक्यस्य प्रा
तिपदिकसंज्ञा स्यात् न च तत्र प्रत्ययांतपर्युदासेन निर्वाहः प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य चेति प्रकृतिप्रत्ययसमुदायस्यैव ग्रह
णात् नन्वर्थवत्वाभावादेव न दोषः अन्वयव्यतिरेकाभ्यां पदानामेवार्थवत्वात् वाक्यार्थस्य चाकांक्षादिलभ्यत्वात् मैवं ध्वनिव्यंग्यपनितं वाक्यं
पदार्थसंसर्गरूपविशिष्टवाक्यार्थवाचकं अन्यथा वाक्यार्थस्याशाब्दत्वं स्यात् तथा च वाक्यमेव मुख्यः शब्दो वाक्यार्थ एव मुख्यः शब्दार्थः पद
पदार्था व्युत्पादनाय तु लाघवार्थं सादृश्यात्कल्पिता अन्वयव्यतिरेकावाश्रित्य कल्प्यन्ते प्रतिवाक्यव्युत्पत्त्यसंभवादिति सिद्धांतात् अत्र वार्तिकं अर्थवत्स
मुदायानां समासग्रहणं नियमार्थमिति नन्वेवं बहुपटवच्चकैर्नीचकैरित्यादीनामपि संज्ञा न स्यात् द्योत्यवाच्याभ्यामर्थाभ्यां प्रत्ययस्य प्रकृतेश्चा
र्थवत्वात् अर्थवत्समुदायत्वरूपप्रतियोगितावच्छेदकत्वधर्मावच्छिन्नत्वात् न च संज्ञाविरहे यथा स्वाद्युत्पत्तिर्न भवति तथा पूर्वोत्पन्नविभक्तिलो
पोपि न भविष्यतीति तयैव सिद्धिरिति वाच्यं स्वरदोषप्रसंगात् तथा हि चितः इति सूत्रे चितः प्रकृतेर्बहुजकजर्थमिति वचनात्प्रकृतिमंतर्भाव्य चि एम०
त्स्वरो विधीयते तथा च पटवः इति जसंतस्य बहुचं प्रति प्रकृतित्वात् जसकारस्योदात्तत्वं स्यात् पूर्वोत्पन्नजसो लोपे तु पुनरुत्पन्नविभक्तेः प्रकृतावंत २४

© Dharmartha Trust J&K. Digitized by eGangotri

भोगात् टकारककारस्योच्चारणत्वमिति सिद्धमिदं उच्चकैरित्यादावपि अकच्येतेः समुदायाद्विभक्त्यभावे पदत्वाभावादुच्चकैः पठतीत्यादौ तिङ्ङतिङ इति निघाता
नुपपत्तिः पदादित्यधिकारात् तन्मध्यपतितेन गाय स्थानाश्रयणे चेदं यस्मात्प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा भवत्येवेति ज्ञापनार्थं अव्ययस्य पद इति
वक्तव्यं नैवं बहुपटव इत्यादेरपि तेन निषेधापत्तिः प्रत्ययान्तस्यैव प्रतिषेधात् न च संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावः यत्र संज्ञाविधेयात्तत्रैव तन्नि
धात् अत एव संज्ञाप्रतिषेध इति वैषम्यात् न च जसन्तं बहुपटव इत्येतदपि प्रत्ययान्तमेवेति वाच्यं पटुशब्दादेव जसुत्पत्तेः समुदायस्यानन्तरं तत्त्वाभावात् न च न
विधते प्रत्ययो यस्मिन्निति तद्बहुव्रीहिणा प्रत्ययादेरपि बहुपटव इत्यनिषेधः स्यादिति वाच्यं वर्तिपदार्थप्राधान्येन तत्स्वरूपस्यान्तरंगत्वात् अत एव भाष्ये तुल्यजा
तीयस्यैव समासस्य ग्रहणे न नियमः क्रियते सुबन्तानामेव समासविधानात् न चापि श्रीतीत्यादौ गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्प
त्तेरिति भाष्यग्रंथोपपत्त्या कृदन्तपरत्वेन व्याख्यातः केचित्तु यत्र संघाते पूर्वो भागः पदं उत्तरः सुबन्तप्रत्ययः तस्य व्यावृत्तिः बहुपटव इत्यत्र पूर्वभागस्य पदत्वा
भावान्न दोषः जन्मवानित्यादौ तु तद्भागस्य प्रत्ययत्वात् न च तद्धितग्रहणसामर्थ्यं औपगव इत्यादौ पूर्वस्य भसंज्ञत्वात् तत्र चरितार्थत्वात् न चान्तर्व
र्तिविभक्तिमाश्रित्य पदसंज्ञा तुल्यावधिकया भसंज्ञया तद्बाधात् न चाप्यमित्यादित्यादिसमुदायस्य संज्ञाप्रसंगः पूर्वभागस्य पदत्वेप्युत्तरस्यप्र

© Dharmartha Trust J&K. Digitized by eGangotri

सि०मु० त्यपत्वादुक्तनियमस्यात्रप्रवृत्त्यभावादितिवाच्यं तद्धितत्वस्यापिप्रवृत्त्यविशेषणत्वात् तद्धितत्वाभावप्रयुक्तविशिष्टाभावस्यात्रानपायादित्याहुः न
२५ चसुप्तिङ्समुदायस्यसंज्ञापत्तिः जहत्कर्मणावहुलमाभीक्ष्ण्येकर्तरिचेतिसिद्धानीत्यस्यनियमार्थत्वात् यद्यपिसमाससंज्ञासमासांतोदात्तार्थ्या तथापि
25 समासत्वादेवप्रातिपदिकत्वमितितत्तुल्यजातीयताप्रतिपादनार्थमेतदुक्तमितिकैयटः अत्रपक्षधावतीत्यादेस्तिङ्समुदायस्यतदापत्तिः आख्यातमा
ख्यातेनक्रियासातत्येइत्यस्यनियमार्थत्वात् तस्मात्समासग्रहणेनतुल्यजातीयानांसर्वेषांवाक्यानांनियमान्निवृत्तिरितिसिद्धं अत्रवदंतिनैयायिकमतेस
मासस्यशक्तिलक्षणोभयरहितत्वादर्थवत्वाभावात्प्रासंज्ञाविधायकत्वेवहुपटुत्वहृत्यादेरसिद्धिः तद्धितांतत्वाभावात्समासत्वाभावात् नचतद्धितग्र
हणंतद्धितशिष्टपरमितिवाच्यं पचेतकिंहत्यादावव्याप्तेरिति तत्र पदार्थद्वयविशेष्यत्वप्रकारत्वाभ्यामन्वयबोधात्रविशिष्टार्थलाभस्ताहृशसमुदायस्यैवतैरनर्थ
कत्वोपगमात् वहुचरस्तुस्वार्थिकप्रत्ययत्वेनपटुशब्दस्यैवकतदर्थकत्वात् तथाचायंविशेषः वैयाकरणानांवाक्यसमासयोरपिवहुपटवःत्यादिष्वर्थवत्वात्स
मासग्रहणस्यनियमार्थत्वात् वाक्यवहुपटवहृत्यादेरपिव्यावृत्तिप्रसक्तौतद्यावृत्तिनियमप्रतियोगितावच्छेदकंरूपमित्याश्रित्यवाक्यस्यसंज्ञावार्यते ए०म०
नैयायिकानांतुसमासस्यविशेषविधानात्संज्ञा नतुवाक्यस्य विशेषविध्यभावादर्थवत्वाभावेनसामान्यविधेरप्रवृत्तेश्च वहुपटवहृत्यादेस्तूभयमते १५

© Dharmartha Trust J&K. Digitized by eGangotri

प्यर्थवत्वादेवप्रातिपदिकसंज्ञेति यदप्युक्तं समासग्रहणस्यनियमार्थत्वाभावेमूलकेनोपदंशमित्यादौसमुदायस्यसंज्ञाप्रसंगः कृद्ग्रहणेगतिका
रकपूर्वस्यापिग्रहणात् वैयाकरणमतेतु समासग्रहणकृतनियमेनपरत्वान्नबाधात् एवंचकृत्तद्धितेतिसूत्रेकृद्ग्रहणपरिभाषानोपतिष्ठतएवकृल्लभा
शादिति तदप्यसत् विधिमुखेननियमप्रवृत्तौनिषेधस्याप्राप्तत्वात् प्रत्यक्षविधिनासमंविप्रतिषेधायोगात् आतिदेशिकस्याप्रत्यक्षस्यदुर्बलत्वात् नि
षेधस्यसमासभिन्नपरतयापाक्षिकत्वात्कृत्तद्धितपरतयाप्यवश्यकल्पनीयत्वात् निषेधमुखेनप्रवृत्तिरितिपक्षेपिकृद्ग्रहणपरिभाषयाकारकपूर्वस्यापिसंज्ञायांसि
द्धायां परेणापिनियमेनव्यवच्छेदोनस्यात् कारकपूर्वस्यप्रातिपदिकसंज्ञाविधेरन्यत्रसावकाशत्वाभावात् सावकाशनिरवकाशयोर्विप्रतिषेधानुपपत्तेः न
चनियमानुरोधात्तदप्रवृत्तिः नियमस्यकृत्तद्धितपरत्वेकृद्ग्रहणपरिभाषासंकोचेवाकल्प्यतइत्यत्रनियामकाभावात् परिभाषायाअप्रवृत्तौनियमस्य
कृत्साधारण्यं तत्सिद्धौतुपरिभाषायाअप्रवृत्तिरित्यन्योन्याश्रयापत्तेश्च प्रत्युततस्याःप्रथमोपस्थितिकतयाकारकपूर्वस्यसंज्ञासिद्धौनियमस्यकृत्सा
धारण्यं तत्सिद्धौतुपरिभाषायाअप्रवृत्तिरित्यन्योन्याश्रयापत्तेश्च प्रत्युततस्याःप्रथमोपस्थितिकतयाकृत्तद्धितपरतायाएवयुक्तत्वात् अतएवकृत्त
द्धितेत्यत्रकृद्ग्रहणपरिभाषोपस्थानेमूलकेनोपदंशमित्यत्रसमासाभावपक्षेपितृतीयायाअलुक्स्यात् नचसमासविकल्पविधिवैयर्थ्यं दधिउपदं

© Dharmartha Trust J&K. Digitized by eGangotri

सि०कौ० शमित्यत्र शाकलप्रकृतिभावार्थं तपरत्वोपपत्तेः अन्यथा मैवाव्ययेनेति नित्यसमासापत्त्या सिन्नित्यसमासयोः प्रतिषेधो वक्तव्य इति शाकलप्रकृ-
२६ तिभावनिषेधापत्तेरिति कैयटेन चतुर्थे उक्तं गतिकारकोपपदात्कृदिति उत्तरपदप्रकृतिस्वरविरहार्थं तपरत्वोपपत्तिरिति च सीरदेवेनोक्तं परत्वा-
26 त्रिपमे नते संज्ञाबाधमनभिधाय कृद्ग्रहणपरिभाषायाः प्रवृत्तेरेव तेनाश्रयणमयुक्तत्वात् तथाहि गतीत्यत्र समासान्तो गोवृषयोगादित्यादिव-
चनैः प्रादिप्रत्ययेः स्यादित्याशंक्य प्रेष्ठादिसंग्रहीयस्य प्रातिपदिकत्वाभावात्स्त्रीप्रत्ययानुपपत्तिरित्युक्त्वा कृद्ग्रहणपरिभाषया समुदायस्य कृदंतत्वात्स-
संज्ञा स्यादित्याशंक्य प्रत्यय इति पर्युदासाश्रयणात्तस्य प्रातिपदिकसंज्ञायाः अप्राप्तावपि कृद्ग्रहणेन कृदन्तस्य संज्ञानन्तु कारकपूर्वस्यापि इत्युक्तं
तस्मात्समासे कृते तन्निबंधनप्रातिपदिकसंज्ञया स्त्रीप्रत्यय इति तदर्थः अतस्तत्र कृद्ग्रहणपरिभाषा नोपतिष्ठते इत्युभाभ्यां वाच्यं तस्मादेवं स-
माधेयं कृत्तद्धितेत्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविध्यभावेपि अर्थवदित्यस्यानुवृत्त्या क्रियादशायामन्वयव्यतिरेकाभ्यां कल्पितामर्थवत्तामा-
श्रित्य प्रकृतिप्रत्यययोर्मिलित्वा पदार्थबोधकत्वे तदर्थबोधकसमुदायस्य प्रातिपदिकसंज्ञेति तावन्मात्रादावेवस्यघं तत्तश्चैनेपायिकमतेपि अर्थवद्ग्र- एम०
हणानुवृत्त्या कृत्प्रत्ययसमुदायस्यैव विधानसामर्थ्यात्संज्ञानन्तु कारकपूर्वस्यापि अधिकग्रहणे प्रमाणाभावात् तस्मात्परिभाषाया एव प्रवृत्त्ये २६

© Dharmartha Trust J&K. Digitized by eGangotri

भागात् अवतमे नकुलस्थितं उदके विशीर्णमित्यादौ तथैव दर्शनात् चेति दिक्। नन्वेतत्सूत्रं व्यर्थं व्युत्पत्तिपक्षे कृदन्ततयैव सर्वत्र सिद्धेरिति चेत्
अव्युत्पत्तिपक्षे सार्थकं स्यात् तत्र चेदमेव ज्ञापकमिति प्राञ्चः। निरुक्तेप्युक्तं नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वै
याकरणानां चैके इति व्युत्पत्तिपक्षेपि निपातनार्थमनुकरणार्थं चेति हरदत्तोक्तं तु चिन्त्यं तत्रापि प्रकृत्यादिकल्पनसंभवात् वस्तुतस्तु व्युत्पत्तिपक्षेपि
बहुपटवदत्साद्यर्थं सूत्रं न चैवं बहुपूर्वं हृत्यादौ सत्त्वापत्तिः मूलकेनोपदंशमित्यादौ कृदन्तत्वेनातिप्रसंगात् अर्थवत्सूत्रे विना समासग्रहणस्यानियमार्थ
त्वायोगादिति दीक्षिताः। तन्न भेदविवक्षायामनुकरणानां प्रकृत्यादिकल्पने मानाभावात् अयं तु विशेषः भेदविवक्षापक्षे न कार्येणार्थवत्त्वात् प्राति
पदिकसंज्ञा भवत्येव गित्यादिवत् अभेदविवक्षायां तु न गवित्ययमाहेत्यादिवत् मूलकेनेत्यादावतिप्रसंगस्य च निरस्तत्वात्॥ ॥कृत्तद्धितस
मासाश्च कृदन्तं तद्धितान्तं समासाः प्रातिपदिकसंज्ञाः प्रत्ययान्तप्रतिषेधस्य पूर्वमुक्तत्वात् तदपवादस्यास्य प्रत्ययान्त एव प्रवृत्तेः संज्ञाविधौ प्रत्यय
नात्र प्रवृत्तिरिति न्यासकारः लिङ्घ्रुकृदन्तादौ अधातुरिति कर्तौत्यादौ अप्रत्ययान्तमिति पर्युदासेनाप्राप्तेः प्रमारंभः समासग्रहणं च नियमार्थमिति व्याख्या
तन्न तु समासस्य प्रत्ययान्तत्वाद्दप्राप्तविधित्वं स्यात् मैवं प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात् न च स्त्रीप्रत्यये चानुपसर्जने नेत्यनुपसर्जे

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु० नस्त्रीप्रत्ययेतदादिनियमाभावाद्राजकुमारीत्याद्यर्थं स्यादितिवाच्यं अतएवंगस्यापिहृष्ट्यादिलोपस्यलक्षिणेप्रवृत्त्यभावात्तद्रूपमारोप एव।
२७ सुपिसमासप्रवृत्तेः परिहृत्यापवादविषयमितिन्यायात् तेनाप्रत्ययान्तत्वेनसमासवाक्येप्रवृत्त्यापाःसंज्ञाया एकदेशविकृतन्यायेननिभ
27 क्तिलुक्यपिसुलभत्वात् अतएवगोमत्प्रियपदस्यापीदोननुमादयः लुकालोपेप्रत्ययलक्षणाभावात् ननुतथाप्यसमर्थसमासेविध्यर्थस्या
त् मैवं अर्थवशेनविभक्तेः तस्यैवानर्थकत्वात् नचैवंतत्रसंज्ञानापत्तिः धानियाहकमानेनतत्सिद्धेः असूर्यललाटयोरित्यनेननखत्तूप
शब्दे उपपदे खश् विभक्तिंनत्वं विना च उपोत्पादितपरस्परपोपपदत्वानुपपत्तेः स्यादेतत् शशविषाणादिसमासार्थमयमपूर्वविधिः तेषामनर्थ
कत्वात् ननुशशपदंशशसंबंधाभाववत्परं तस्याभेदेनविषाणान्वयःतथाचशशसंबंधाभाववदभिन्नंविषाणमित्यर्थबदेवतदितिवाच्यं शशवि
षाणंनास्तीत्यस्यापोपपत्त्यापत्तेः अतएवविषाणेशशसंबंधाभावनिष्ठप्रदेशापांशशविषाणनिर्मितंकार्मुकमितिवाक्यात्रशाब्दधीरित्यभिप्र
त्ताः अतएवैषवंध्यासुतोयातिखपुष्पकृतशेखरः मृगतृष्णांभसिस्नातःशशशृंगधनुर्धरइत्यादेरपार्थकत्वमितितीरस्वामीत्यादिभिरुक्तं एम०
अतएवसंगतिग्रहणाःभावाच्छशशृंगादिपदानामबोधकत्वेतिवौद्धाधिकारदीधितावुक्तं मैवं शब्दज्ञानानुपातीवस्तुशून्योविकल्पइतिपा २७

© Dharmartha Trust J&K. Digitized by eGangotri

तेनलक्षणात् शशविषाणादेरलीकस्यापि शब्दबोध्यत्वात् अनेन पदेनालीकं बोध्यमिति वक्तृत्वस्वीकाराच्च अत एव गगनकमलस्यापि
शब्दाभासप्रतिपन्नत्वादिति लीलावत्यामुक्तं अयं तात्पर्यविज्ञानमर्थे शब्दः करोतीति हीति त्वं उन्नाकारोऽस्त्वेव सक्तो नैतेन त्रिपादात्तत्ताभावव्र
त्तियोगित्वि शशपदस्य लक्षणा तेनैवं तदर्थे नाऽर्थवत्त्वात् प्रातिपदिकसंज्ञा शशसंबंधविशेषवद्विषाणमिति धीरस्तु भ्रमादेव एतेन शशविषाणं
नास्तीत्यपि व्याख्यातं शशसंबंधविशेषस्यैव तत्र प्रतियोगितावच्छेदकतया भ्रमविषयत्वात् अत एव शशादिप्रत्येकपदार्थान्वयस्तत्र स शश
विषाणादिपदात्तदर्थप्रत्ययप्रसंगादिति दीधितावुक्तं विशिष्टस्यार्थवत्त्वेनास्तीत्यभिप्रायात् अयं तु विशेषः तादृशार्थविशेषशक्तस्य शशवि
षाणादिसमासस्य कदाचित्कभ्रमादन्यथा बोधकत्वमिति प्रांचस्तु खपुष्पशशशृंगादिशब्दानामभाववचनत्वादर्थवत्त्वं तथाहि खपुष्पं
नास्तीति विग्रहे नञर्थान्तर्भावः विग्रहे नास्तीति कथनं समासार्थविवरणार्थं समासोत्तरं नास्तीति पदर्जनं त्वनुवादमात्रं स्पष्टं चैतन्मीमांस
वार्त्तिककारादिभिराहुः इति दिक्॥ ॥ ह्रस्वो नपुंसके प्रातिपदिकस्य॥ अजंतस्य प्रातिपदिकस्य नपुंसके ह्रस्वः स्यात् ह्रस्वश्रुत्याचस्त्वुपा
स्थितौ तदंतविधिः प्रातिपदिकसंबंधिनोऽवरत्वान्वये वैयाकरणप्य सुवाधुत्वमित्यादावतिव्याप्तिश्च स्यात् न च नपुंसकपदेनैव प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु० तिपदिकास्येव संभवात्तदुपादानवैयर्थ्यं कांडेकुम्भे रमते ऽत्रासरणाकुलमित्यादिव्याहत्यर्थत्वात् साधनाश्रयसंख्यावल्लिंगस्याप्यु
२८ पादानसंभवात् न चोक्तन्यायेन दोषाश्रासरणाकुलमित्यादौ सह चरितत्वाद्दोषाशब्दस्योपचारिकं त्वेऽव्ययस्यापि द्रव्यत्वापत्तिः प्रा
28 तिपदिकत्वादिति वाच्यं दोषादिवाइतिशब्दोहि रात्राववहनीति सप्तम्यर्थविशिष्टार्थो ऽत्रासरणाकुलसाधनानां क्रियाणां अधिकरणं
कालो भवन्नासरणाकुलस्याधिकरणं दोषाइत्यनेनैवरत्यधीनेवेति आधेयव्यवधानेनाधिकरणस्य क्रियाधारत्वात् ततश्चाव्ययेन कृतकस्या
धिकरणमेव न तु नपुंसकमपीति ननु कांडीभूतं त्रासरणाकुलं इत्यादौ प्रकृतिविकृत्योरभेदविवक्षायां च्विप्रत्ययान्तस्यापि नपुंसकत्वाद्व्याप्तिरिति
कृते ह्रस्वे च्वौ वेति दीर्घो भविष्यतीति वाच्यं अंतरंगे दीर्घे बहिरंगस्य ह्रस्वत्वस्यासिद्धत्वात् एवं रमते इत्यत्रापि ह्रस्वत्वे टेरेत्वेनेति पोऽर्थमिति वेत्र
असत्तवाचित्वादव्ययस्य नपुंसकत्वाभावात् एतेन तिङंतमपि व्याख्यातं शक्त्याश्रयद्रव्यनिष्ठसंख्याप्रतिपादकस्याप्याख्यातस्य तद्दी
यलिंगप्रतिपादने सामर्थ्यविरहात् शाब्दपाकि स्वाभाव्यात् कांस्ये इत्यत्रापि नपुंसकत्वाभावः संख्यापाः प्राधान्यात् अवयवधर्मेणास एम०
मुदायस्य नपुंसकत्वव्यपदेशो व कांडेकुंडे इत्यत्र स्यात् प्रातिपदिकविभक्त्योरेकादेशस्य प्रातिपदिकग्रहणेन ग्रहणात् ह्रस्वो नपुंसके २८

© Dharmartha Trust J&K. Digitized by eGangotri

पत्नयेतिप्रत्ययं स्यात् साक्षात् तस्यैवयपदान्पुंसकत्वं तदाह तेन त्ववयवकारके तस्मिन्निति तदर्थः अथवा तस्यैवान्तपगांतव्यतिरेके
सेत्यर्थः विभक्त्यंतेषोपजातव्यतिरेकमिति नातिप्रसंगः स्वकारस्यत्वपमभिप्रायः मध्यमेवात्र नपुंसकह्रस्वत्वमिति प्रातिपदिकं गृह्यते अ
तएव द्राग्वातिदेशात् प्रातिपदिकत्वेन ह्रस्वमिति गवरव्यापगुरुस्ववान्यध्गुगवरवेभ्यस्त्यादेस्तु न ह्रस्वः बहिरंगत्वाद्दीर्घानामासिद्धत्वात् एव
मपि रवद्वापेत्यादौ तेरस्त्वेनाद्रुत्वोपि नेति व्याख्येयं॥ ॥गोस्त्रियोरुपसर्जनस्य उपसर्जनेति गोस्त्रियोस्तदंतप्रातिपदिकस्य विशेषणं
तेन तदंतविधिः अहणवता प्रातिपदिकेनेति निषेधस्य समासप्रत्ययविधिमात्रविषयकत्वात् तथा च उपसर्जनं यत् गोस्त्रियौ तदंतस्य
प्रातिपदिकस्य ह्रस्वः स्यात् अतिलोमस्य गिः कौशांबिः अतिरवट्‌वः एकविभक्ति चेत्युपसर्जनत्वे चित्रगुः प्रथमानिर्दिष्टत्वात् स्यादेतत्
अतिश्रीः अतिलक्ष्मीरित्यादौ ह्रस्वत्वं स्यात् अत्र वार्तिकं गोटाद् ग्रहणं कृत्स्निवृत्त्यर्थं ईयंत्वीराणां धातुस्त्रीणां चेत्यर्थः तथापि तिष्ठापमार
स्य पञ्चारेणकारे गाज्ञा पोन्हाः तथा च कृदंतस्त्रीणां तद्धर्मिभावाद्दोषः भाष्यकारस्त्वाह स्त्रीग्रहणं स्वरितं मात्रप्रत्ययस्त्रिपादिस्वधिका
रविहितस्यैव प्रत्ययस्य ग्रहणं ते स्वरितेनाधिकारादिति सूत्रेस्य पनस्वरितत्वे तेन तदधिकारोपादानमित्यपि व्याख्यास्यमानत्वात् नन्वेवं राजकु

© Dharmartha Trust J&K. Digitized by eGangotri

मारिरित्यादौ ह्रस्वो न स्यात् अप्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य च ग्रहणात् कुमारशब्दस्य ङी प्रकृतित्वात् कुमारीशब्दस्यैव स्त्रीप्रत्ययांततया त्वत्तु
राजकुमारीशब्दस्येति चेन्न स्त्रीप्रत्यये तदादिनियमाभावात् अत एव परमकारीषगंधीपुत्र इत्यत्र ष्यङः संप्रसारणमित्यस्य प्रवृत्तिः न चोपसर्जनस्त्री
प्रत्यये तदादिनियमोऽस्त्येव अन्यथातिकारीषगंध्यापुत्र इत्यत्रापि संप्रसारणापत्तेः अत्र केचित् उपसर्जनस्त्रीप्रत्ययेऽपि तदादिनियमो नास्ति
हल्ङ्यादिसूत्रे दीर्घग्रहणात् अन्यथा निःकौशांबिरतिखट्व इत्यादौ उपसर्जनत्वात् ध्यावंतत्वाभावादेव सुलोपानापत्तेस्तद्वैयर्थ्यापत्तेः न त्वेवं
कुंभकारीशब्दादपि स्त्रीभ्यो ढगुत्पत्त्या कौंभकारेय इति सिद्धौ अनुपसर्जनादित्यत्र तत्सिद्धिर्न स्यादिति भाष्यविरोध इति चेत् न तत्र तदादिनियमाभावे कुं
दादिकारीशब्दादपि तदापत्तेरित्यतिदेशापादिति न्यासकारस्त्वाह अंगसंज्ञासूत्रे योगविभागलभ्यैषा परिभाषा तत्रैवामीत्यत्र व्यवस्थितविभाषा
र्थस्य वा शब्दस्यानुवृत्तिमाश्रित्यात्र न प्रवर्तिनेति व्याख्येयं पद्माङ्कितेत्यतोऽनुक्तसमुच्चयार्थश्चकारोऽनुवर्त्यत इति स्यादेतत् गोकुलमित्यादाव
तिप्रसंगः कुमारीपुत्र इत्यत्र कुमारीशब्दस्य प्रत्ययान्तत्वात् प्रातिपदिकत्वे विराजकुमारीशब्दस्य समासप्रातिपदिकत्वाद्राजकुमारीपुत्र इत्यत्रापि
खट्वापादो मालापाद इत्यादौ तु नेतच्छंका उभयत्राप्याश्रयेणादिवद्भावनिषेधात् अह हि प्रातिपदिकस्त्रीप्रत्ययपक्षाभ्यामीयते स्त्रीप्रत्ययांतं यस्मादिति

© Dharmartha Trust J&K. Digitized by eGangotri

:४५८

पत्निकमिति एकादेशस्य यदि प्रातिपदिकस्यांतवत् तदा स्त्रीप्रत्ययांतत्वं नास्ति अथ स्त्रीप्रत्ययस्यादिवत्तदा प्रातिपदिकत्वं नास्तीति मैवं गोकुलमित्यादौ
तदेतत्त्वाभावात् प्रातिपदिकेऽव्यपदेशिवद्भावस्यानिषेधात् ननु येन विधिरिति सूत्रे सेराप्राप्नोतीत्यस्य चेति वार्त्तिककृता तेनोक्तत्वात्स्वं रूपमित्यस्यानुवृत्ति
रिति लभ्यते तथा च गोत्वाभावेऽपि गोशब्दस्वरूपत्वादेव गोकुलमित्यादौ ह्रस्वः स्यात् मैवं स्वं रूपमित्यस्यानुवृत्तेः आद्यंतवत्सूत्रे येन विधिस्त
दंतस्येत्यप्रयोजनमिति वार्त्तिकोक्तेः न च तथापि तस्य चेति वार्त्तिकाद्देव गोकुलमित्यत्र ह्रस्वापत्तिः तस्य वार्त्तिकमात्रशेषत्वात् नापि द्वितीयः उपसर्ज
नेयः स्त्रीप्रत्ययस्तदंतस्योपसर्जनस्येत्युक्त्यापत्तियोगिकं यस्योपसर्जनत्वं तत्त्वमिति योगिकस्यैवोक्तत्वस्य लाभात् राजकुमारीशब्दस्यातु पुत्रशब्देन
यः षष्ठीसमासस्तत्रविरूपितोपसर्जनत्वसत्त्वेऽपि तत्र निरूपितांतत्वाभावात् अन्यथा पूर्वपदस्य तिषेधइति वार्त्तिकारंभेऽप्यनिर्वाहात् पंचकुमार्यः प्रिया
अस्येति त्रिपदे बहुव्रीहौ वाद्यपदद्वयस्य तद्धितार्थोत्तरपदेति द्विगुसमासे कुमारीशब्दस्य पूर्वपदत्वाभावात् ह्रस्वापत्तेः मित्रप्रतियोगिकयोरंतत्वोप
सर्जनयोः सत्वात् एतेनऽतिगोपुत्र इत्यपि व्याख्यातं अथ तथापि द्वंद्वस्य प्रतिषेधो वक्तव्यः कुक्कुटमयूर्याविति अत्र समासार्थे ऽवयवार्थस्योपसर्जनत्वा
दनेकमित्यनुवृत्त्या प्रथमानिर्दिष्टत्वाच्च मयूरीशब्दस्योपसर्जनत्वात् ह्रस्वेनैव समासेन तत्त्वाच्च मैवं परवल्लिंगमिति शब्दशब्दार्थाविति वचनमात्रत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु०
३०
30

द्विगतर्थबोधकप्रत्ययोभयातिदेशस्वीकारान्नपुरीशब्दस्योत्करीत्याद्यन्तत्वेपिद्वंद्वसमासो न्नेऽरंगी प्रत्ययोपपत्तेः अव्ययार्थयोरेवपरस्परसन्निहित
योर्द्वंद्वार्थत्वमितिप्राधान्यादुपसर्जनत्वाभावाच्च स्यादेतत् कपिप्रतिषेधोक्तेर्व्यवहुकुमारीकः विषयसप्तमीचेयं कपःपूर्वमेवांतरंगत्वात् ह्रस्व
प्रवृत्तिसंगात् नचनेकपीतिनिषेधः केणइतिप्राप्तेरेवतेनप्रतिषेधादनंतरस्येतिन्यायात् अन्यथापिप्रियंग्रामणीकस्यापिप्रग्रामणिकइत्यादेरप्यनि
षेधापत्तेः कुलादिविशेषणत्वादग्रामणीशब्दे क्लीवत्वे नैवं कपः समासांतत्वपवत्त्वात्कपिकृते स्त्रीप्रत्ययांतस्यसमासप्रातिपदिकत्वविरहात् व
हुपगगूकइत्यादौ अतिमालइत्यादौ वद्वयोःसावकाशत्वापरत्वात्कप एवप्रवृत्तेः नचोपसर्जनस्त्रीप्रत्ययांतप्रातिपदिकमात्रापेक्षं ह्रस्वत्वमंतरंग
कत्तुसमासविशेषस्य न्यग्रुत्तरपदबहुव्रीहेः सापेक्षत्वाद्बहिरंगइतिवाच्यं समासार्थोत्तरपदंतांतः समासांता इतिपक्षे कपोऽवयवापेक्षत्वात् ह्रस्वस्यवसमुदाया
पेक्षत्वात् सर्वेभ्यः समासकार्येभ्यः कपोंतरंगत्वात् तस्मादीयसोबहुव्रीहेः प्रवद्वचनमित्येववार्त्तिकमारभ्यं वक्ष्यश्रेयसोऽस्यबहुश्रेयसी ईयसश्चेतिकप्प्र
तिषेधः बहुव्रीहेःकिं श्रेयसीमतिक्रांतोऽतिश्रेयसिरितितत्पुरुषेयथास्यात्॥ ॥ लुकृतद्धितलुकि स्त्रीप्रत्ययस्यलुक्तद्धितलुकिसति अमावद्व एम० ३०
पस्यलुकःपरत्वासंभवात् पंचेंद्राण्योदेवता अस्य पंचेंद्रः तद्धितार्थेतिसमासः ततःसास्यदेवतेत्यण् तस्यद्विगोर्लुगनपत्य इतिलुक् इंद्रवरुण

© Dharmartha Trust J&K. Digitized by eGangotri

त्यादिना विहितस्य ङ्यापोऽनेन लुक् सन्नियोगशिष्टन्यायेन आनुकोऽपि निवृत्तिः पंचभिः शष्कुलीभिः क्रीतः पंचशष्कुलः तेन क्रीतमित्यार्हीयस्य ठ
को ध्यर्द्धपूर्वेति लुक् आमलक्याः फलं आमलकं नित्यं वृद्धशरादिभ्यः इति मयट् फले लुक् एवं बदरं कुवलमिति शष्कुल्यादयो गौरादिषु पठिताः लौ
किकं चैषामुपसर्जनत्वं गामित्यापादुभयविधस्याप्यस्य ग्रहणात् लौकिकं गार्गीकुलं गार्ग्यस्य छात्राः यञश्चेति ङीप् यस्येति चेत्यकारलोपे हलस्तद्धितस्ये
ति यकारलोपः स्यादेतत् अवन्तेरपत्यं गोत्रं स्त्री अवन्ती वृद्धेत्कोशलाजादाञ्ञ्यङ् कुन्ती तथैवं कुरोरपत्यं स्त्री कुरूः कुरुनादिभ्यो ण्यः स्त्रियामवन्तिकुन्ति
कुरुभ्यश्चेति लुक् आर्यायाभ्यामिति मनुष्यजातेरिति ङीष् अन्यात् ऊङुतः इत्यूङ् अत्रांगत्वादीनामुपसर्जनस्त्रीप्रत्ययसत्वात्तद्धितलुक्यकृते तस्मात्स्त्रीप्रत्यय
स्य तु कुरस्मात् मेवं यत्र स्त्रीप्रत्ययान्तात्परस्य तद्धितस्य लुक् तत्रैवास्य लुकः प्रवृत्तेः अत्र च कृते लुकि स्त्रीप्रत्ययोत्पत्तेः तदुक्तं अनुत्कृपरत्वात् स्त्रीप्रत्ययस्य लु
कृत्स्नात्तु दृति उक्तोऽर्थः बुद्धिपरिकल्पितं लुक्परत्वमाश्रित्य तु वार्त्तिककृता तेन [illegible]क्तं भाष्यकृता तस्मात् उपसर्जनत्वोऽभावादेव न दोषः उपसर्जनेन स्त्रीप्र
त्ययस्य विशेषणात् शास्त्रीयस्योपसर्जनस्यासंभवात् अप्रधानरूपोपसर्जनत्वस्याश्रयणात् अवन्तीत्यादौ चापत्यलक्षणापाजातेः प्राधान्येना
भिधानात् अजातिपठितत्वाच्च नङ्क्षत्वं आमलकमित्यादौ तु तद्धितान्तस्याप्यपादकत्वं लिंगविशिष्टस्यैवोपादानात्र लिंगविशिष्टपरिभा

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु० माषाप्रवृत्तिः कुत्रूरित्यत्राप्युभयत्राश्रयणेऽन्तरङ्गत्वान्निषेधात्॥ ॥इद्गोण्याः॥ तद्धितलुकि गोणीशब्दस्योकारविषये इत्त्वं स्यात् पंचभिर्गोणीभिः
३१ क्रीतः पंचगोणिः तद्धितार्थेति समासे क्रीतार्थे ठक् पूर्ववत्तस्य लुक् लुकि प्राप्ते ह्रस्वारंभः अत्र वार्त्तिकं इद्गोण्या नेति वक्तव्यं ह्रस्वतादि विधी
यते इति वा वचनेनैतावन्मात्रार्थे वा कृतमभवेत् गोण्या इत्त्वं प्रकरणात्तद्व्याद्यर्थमप्यापि वा अस्यार्थः ननु गोण्या ङ्निषेध एव कर्त्तव्यो न त्वित्त्वं गोणि
31 योरिति ह्रस्वेन सिद्धेः मैवं नेत्युक्ते इदित्युक्ते वा विशेषाभावात् यदा गोणीमात्रमिदं गोणी इति मात्रप्रत्ययस्य लोपः क्रियते तदा लुकि निषिद्धे ह्रस्वत्वं
सिद्धं तस्मात्प्रथमाविधाने परिमाणग्रहणस्य प्रयोजनं तद्धितविनापि यत्र परिमाणशब्दाः परिमेये वर्त्तन्ते तदापि प्रथमापथा स्यादिति एवं चानुपसर्जन
त्वादस्मे दोपचारेणाप्रमेयवृत्तित्वादप्राप्ते ह्रस्वे इत्त्वविधिः नन्वेवं सर्वत्र गोण्या इत्त्वं स्यात् तदर्थं नुपसर्जनस्येत्यनुवर्त्तत एव ननु तद्धितलुकीति नेनय
त्रस्यार्थो उपसर्जनमर्थान्तरं प्रत्याय्यते तत्रेदमित्त्वं विधीयते न हि तत्र ह्रस्वेन सिद्धिः अप्रातिपदिकत्वेन तदप्रवृत्तेः प्रकारान्तरेणाप्रतीचये गोण्या इत्त्व
मिति अशिष्यमिति शेषः प्रकरणादिति गोण्या इत्येकस्त्रयाणीयं नत्वसन्निधानान्निकोनवजिप्रसंगः वैयर्थ्यप्रसंगात्तेनैव सिद्धेः तथा च ह्रस्वानुव एम०
तौ लुकोपवादो ह्रस्वत्वविधीयत इति सिद्धमिदं सिद्धान्तमाह स्त्र्याः इति यद्यपि गोणीरितिमात्रे लोपेनापि सिद्धं तथापि योगविभागोऽर्थमिदं ३१

© Dharmartha Trust J&K. Digitized by eGangotri

तेन पंचसूचिरित्यादिसिद्धं नचान्यत्राप्याप्रसक्तिः तस्येत्समात्रसिद्ध्यर्थत्वात् तपरत्वं तु दीर्घनिवृत्त्यर्थं नच दीर्घस्य दीर्घविधानमर्थवत् ह्रस्वलक्षणबाधार्थत्वेनो
पपत्तेः नच आव्यमानत्वादेव दीर्घनिवृत्तिः लोकोऽन्त्यस्य स्वरं बाधते न स्वरूपावस्थापरमात्रफलकत्वेनाऽपूर्वविधायकत्वाभावात् ॥ ॥ लुपि युक्तवद्व्यक्तिवच
ने लुपि सति प्रकृतिवल्लिंगवचने स्तः अनेन प्रकृत्यर्थसंबंधिनौ लिंगसंख्ये प्रत्ययार्थेतिदिश्यते प्रकृपदस्य प्रकृतिपरत्वात् प्रकृतिप्रत्ययार्थयोः पर
स्परं प्रकृतत्वेपि प्रत्ययार्थे प्रत्ययार्थातिदेशवैयर्थ्यात् पंचालानां निवासो जनपदः पंचालाः कुरवः अंगाः वंगाः कलिंगाः जनपदे लुप् इति लुप् कुरुशब्दे
एपस्यान्यत्राऽस्याहृति विशेषः पूर्वाभोपवनं चैत्रत अग्रे प्रत्याख्यास्यमानत्वात् व्यक्तिवचने इति किं शिरीषाणामदूरभवो ग्रामः शिरीषाः अदूरभ
वइत्यण् तस्य वरणादिभ्यश्चेति लुप् तेषां वनं शिरीषवनं इत्यत्र णत्वं मा भूत् अन्यथा व्यक्तिसंख्ययोरिव प्रकृतिवत्त्वे वनस्पतित्वस्याप्यतिदेशापत्त्या वि
भाषौषधिवनस्पतिभ्य इति णत्वं स्यात् तदभावत्वे तु ग्रामार्थत्वात् णत्वं फलीवनस्पतिर्ज्ञेय इति भेदस्याख्याविधानाश्रवणात् एवं कटुबदर्या अदू
रभवो ग्रामः कटुबदरीत्यादि स्यादेतत् प्रकृतिगतस्य ग्रामापेक्षया तिरेकस्यापि अतिदेशस्य पक्ष्यापि स्यात् वचनशब्दस्यैकवचनादिवत्प्रत्ययवाचक
त्वात् एकवचनादिसंज्ञाविधिकालेऽनुवृत्तिः पादिवचनशब्दस्यापि पारिभाषिकत्वानपायात् वाक्ये च षष्ठी दर्शनात् नच वचनशब्देन संख्या

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ सु॰ ३२ तिदिश्यत इति वाच्यं तद्वाच्यकशब्दातिदेशाय पर्यवसाने षष्ठ्या अपि संख्याप्रतिपादकत्वेन तदापत्तेः मैवं शिरीषाणां ग्रामस्य चेयः संबंधो वा को भास्ते लुपि
कृते तस्य विशिष्टस्यैव प्रातिपदिकार्थे तर्भावात् मासजात इत्यादिवत् अत्र भाष्यं ग्रामपि वृत्तेर्युक्तं वक्तं प्रापीह यावता युक्ते वेकुरुष्ठकामचारः प्राग्वृत्ते
३२ लिंगसंख्ये ये अस्यार्थः वृत्तेः प्राग्वाक्यावस्थायामपि प्रवृत्ति वाच्यं वक्तुं प्रत्ययार्थेन संबद्धं वस्यानंतरमपि तथैव उभयत्रापि विशेषाभावात् वेकुरुष्वेति
32 चकारस्य भिन्नक्रमत्वात् आगृहीतेष्वेति योज्यं प्राग्गृहीते ये लिंगसंख्ये च शब्दाद्वृत्ते स्थापिते अतिदेष्टुं कामचारः तथा च प्राग्गृहीते ये लिंगसंख्ये तयोर्नातिदेशः किं
तु प्रत्यासत्त्या वृत्तेरस्य ये लिंगसंख्ये तयोरेव तेनैव यथा तावकीनो मामकीन इत्यादौ आदेशवलादुपसर्जनस्यापि संख्याविशेषावगतिर्यथा वा आदेशे प्रथमा
सामानाधिकरण्यदर्शनाद्द्वित्वादि तद्वद्गतिस्तथात्रापि प्रत्ययार्थे तिदिष्टसंख्यावगमात्प्रकृत्यर्थेपि तदवगमः तत्र वक्ता तूपसर्जनं प्रधानार्थमभिधत्ते यत्तु व्यतिरे
काभावात्संख्यामात्रं प्रत्ययार्थः प्रातिपदिकार्थे प्रथमैव भवति शिरीषाणां मनुष्याणामित्यादौ तु मनुष्यादिजनित व्यतिरेकाभावे तावद्धी शिरीषग्रामयोर्यः संबंधः
तस्यैव वृत्तावंतर्भावात् अथवा मा भूः वृत्ते ये लिंगसंख्ये तेन्यातिदेशः तेन षष्ठीकस्मात्र भवति सामान्यातिदेशो विशेषानतिदेश इति भाष्ये पाठांतरं तत्र वा एम॰
क्यावस्थायां प्रकृत्यर्थस्य ये लिंगसंख्ये ते अतिदिश्येते षष्ठी तु व्यतिरेकनिबंधना न चेह प्रत्ययार्थस्य व्यतिरेकोस्ति न च व्यतिरेकरहिता संख्यातिदि ३२

© Dharmartha Trust J&K. Digitized by eGangotri

ष्यते संख्यामात्रातिदेशे संबंधसलिन्नसंख्यातिदेशाभावादित्यर्थः इति कैयटः अत्र वार्त्तिकं समासे उत्तरपदस्य बहुवचनस्य लुपः वृत्तिपदार्थानामेवापेक्षि
तपरस्परार्णां द्वंद्वार्थत्वास्ति द्वैनियमार्थमिदं उत्तरपदे यत्र बहुवचनस्य लुप् तत्रैव बहुवचनातिदेशो न तु पूर्वपदेपीति मथुरापंचालाः नेह पंचाल
मथुरे एवं मधुरागोदा इति ननु मधुरागोदे द्वंद्वे विजोपदार्थस्याकांक्षा नेति कैमादिति कैयटः ॥ ॥ विशेषणानां चाजातेः लुवर्थस्य विशेषणा
नामपि तद्वदेव लिंगवचने स्तो न तु जातेः पंचाला रमणीयाः गोदौ रमणीयौ गोदौ द्वे विशेषौ विशेषणानां विशेष्यसमानयोगक्षेमत्वात्सिद्धेपि जाति
प्रतिषेधार्थमारंभः पंचाला जनपदः गोदौ ग्रामः जनपदग्रामशब्दौ जातिवचनौ एवं तद्विशेषणोपि गोदौ ग्रामो रमणीयो वक्तव्यादि अत्र हि सामा
नाधिकरण्येनान्वये जातिभिन्नानां विशेषणानां युक्तवद्व्यक्तिवचने जातिरूपस्य तु विशेषणस्यानेनार्थः वैयधिकरण्येनान्वये तु जातेरपि निविशे
षणानि तेषां नेति भवति नानसंबंधादसमर्थसमासत्वात् आये पंचाला जनपद इति सिद्धं सुभिक्षः संपन्नपानीयो बहुमाल्यफल इति
तद्विशेषणानां तु बहुवचनं न तत्स्यात् अंते वैपरीत्येन योज्यं तस्मात्सूत्रे आजातेरिति आङ् मर्यादायां तेषां चापावेन्ना भवति लिंगस्त्रीवच
नायवतेषांसेनाः ग्रापोदारावषोः सिकतास्त्यादिवत् तेषां तत्र जातयव्यक्तित्वैकव्यक्तिमात्रेपेवद्वचनानानामेवप्रवृत्तेः

© Dharmartha Trust J&K. Digitized by eGangotri

त्वयोगाप्रख्यानात् त्वपिनविधेयो योगस्य यौगिकार्थस्य प्रख्यानादनवगम्यमानत्वात् इत्यर्थः वेवालाइत्यादिभ्योदे
शविशेषबोधस्य पेवालत्वादिप्रकारकस्यैवजायमानत्वात् त्वत्रियविशेषः संबोधितेनबोधस्यानुभवसिद्धत्वाभावात् नतु
हस्त्याजातौ केवलाश्वसंज्ञायामित्यादौ संज्ञाशब्दानामपिश्रुत्पादनमध्येव हस्त्यश्वादिभ्योपिजातिविशेषप्रकारकस्यैवबोधस्य
सोदयात् सत्ये तत्रतद्धितोत्पत्त्यारूपेविशेषात् अत्रत्वस्यरूपश्रावण्यकृतयातदभावादितिस्यामकृत् योगप्रमाणेवतदभावेद
र्शनेस्यात् वशब्दोहेत्वर्थः योगस्यप्रमाणेयोगप्रमाणे यौगिकार्थप्रत्यायकत्वमितियावत् यादेहिपेवालादयः शब्दाः त्वाचे
यादिसंबंधप्रवृत्तिनिमित्तमाभेधायैवजनपदादौप्रवर्तेरन् तदातदभावेयोगाभावेपेवालादिशब्दानामदर्शनमप्रयोगः स्यात्
देउसंबंधाभावेपुरुषेदंडिपदाप्रयोगात् नचेष्टापत्तिः प्रयोगविरोधात् प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् वचन
मेत्यनेनतरेणाशिष्यमित्यनुषंगः प्रधानेप्रकृत्यर्थेनिरूप्यंप्रकारत्वानिरूपितविशेष्यतारूपेणप्राधान्येनप्रतिपाद्यः प्रत्ययार्थोयत्रत
त् प्रत्ययार्थः प्रधानमित्येवेरूपेवचनामितियावत् अशिष्यमनारभ्ये अर्थस्यविशेषणेविशेष्यभावरूपस्यान्यप्रमाणत्वात् ३३

© Dharmartha Trust J&K. Digitized by eGangotri

नियतलिंगवचना एव तेषां संज्ञाः आपो दारा वर्षाः सिकता इत्यादिवत् तेषां तज्जात्यवच्छिन्नैकव्यक्तिमात्रेऽपि बहुवचनान्तानामेव प्रवृत्तेः॥ ॥लुब्यो
गाप्रख्यानात् लुबपि न विधेयो योगस्य यौगिकार्थस्याप्रख्यानाद् अनवगम्यमानत्वादित्यर्थः पंचाला इत्यादिभ्यो देशविशेषबोधस्य पंचालत्वादिप्रका
रकस्यैव जायमानत्वात् भक्त्रियविशेषसंबंधित्वेन बोधस्यानुभवसिद्धत्वाभावात् ननु हस्तीग्जातौ कंबलाच्च संज्ञायां हस्त्यादौ संज्ञाशब्दानामपि प्रवृत्याद
नमस्त्येव हस्तीत्यादिभ्यो जातिविशेषप्रकारकस्यैव बोधस्योदयात् सत्यं तत्र तद्धितोत्पत्त्या रूपे विशेषात् अत्र तु लुप्यावश्यकत्वात् तदभावादिति
न्यासकृत् योगप्रमाणे च तदभावे दर्शनं स्यात् चशब्दो हेत्वर्थः योगस्य प्रमाणं योगप्रमाणं यौगिकार्थप्रत्यायकत्वमिति यावत् यदि हि पंचा
लादयः शब्दाः क्षत्रियादिसंबंधप्रवृत्तिनिमित्तमभिधायैव जनपदादौ प्रवर्तेरन् तदा तदभावे योगाभावे पंचालादिशब्दानामदर्शनमप्रयोगः स्या
त् दंडसंबंधाभावे पुरुषे दंडी इति यथा अप्रयोगात् न चेष्टापत्तिः प्रयोगविरोधात्॥ ॥प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् वचनमित्यनेनेत
रं अशिष्यमित्यनुषंगः प्रधानं प्रकृत्यर्थनिष्ठप्रकारतानिरूपितविशेष्यत्वरूपेण प्राधान्येन प्रतिपाद्यः प्रत्ययार्थो यत्र तत् प्रत्ययार्थः प्रधा
नमित्येवंरूपं वचनमिति यावत् अशिष्यमनारभ्यं अर्थस्य विशेषणविशेष्यभावरूपस्यान्यप्रमाणत्वात् लोकानुभवमूलकत्वात् तै

© Dharmartha Trust J&K. Digitized by eGangotri

सि·सु० नहिप्रत्ययार्थत्वावच्छेदेनप्राधान्यंबोध्यते अनन्तरंसामानाधिकरण्यमात्रेण नाधः घटमित्यादौकर्मत्वादेःप्रातिपदिकार्थस्यप्रकारत्वेपिसंख्यादेः
३४ प्रत्ययार्थस्यप्रातिपदिकार्थप्रकारत्वात् नांतः प्रकृत्यर्थस्याधिक्यचित्रयथानतथाप्रत्ययार्थेपितत्त्वकृत्वेनस्यानुपपन्नत्वात् तथाचक्रमेणलोकवि
रुद्धार्थबोधकत्वादितिचेदेतदपितेनास्पर्यं॥ ॥कालोपसर्जनेचतुल्यं अतीतायारात्रेःपश्चिमार्द्धेनागामिन्याःपूर्वार्द्धेनचसहितोदिवसोद्यतनः
34 विशेषणमुपसर्जनं इत्यादिपूर्वाचार्याणांवचनं तेत्राप्यशिष्यत्वेसमानं लोकसिद्धत्वात् पक्वाल्लोकसिद्धत्वात्ख्योहेतुस्तुल्यः तथाचअशिष्यत्वसिद्धिरि
तियोज्यं॥ ॥जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां एकोर्थः यद्यपिजातिरुपलक्षणं व्यक्तिस्तुपदार्थइतिपक्षेबहुत्वेएकवचनमित्येवप्रकृ
जातेरुपलक्षणत्वेनाख्यायामितिव्याख्यानात् तथापिजातौपदार्थेएतत् तदुक्तंजात्याख्यायांसामान्याभिधानादैकार्थ्यमिति भाष्येतुयद्गार्ग्या
गार्ग्यत्वंतदेकमित्युक्तं तदेतत्स्यापिपारिभाषिकजातित्वाभ्युपगमात् वत्स्तुगर्गेषुगार्ग्यत्वस्यैकस्याभावादितिकेचित् जातिश्चहिसमानका
लीनानेकवृत्तिरदृश्यतेनतुभिन्नकालीनानेकवृत्तिर्डित्थत्वादिः जातिपदार्थपक्षेसर्वेषांजातिशब्देपिजात्याख्यायामित्युक्तिसामर्थ्यात् ननु एम०
त्रपक्षे श्रीहिभ्यआगतइत्यत्रघेर्ङितीतिगुणःस्यात् ह्वानिवृत्तावेनङ·पादेशस्यमध्येसोडिः·ख्यात् मैवं एकस्मिन्नर्थेबहुत्वस्यैवानेनातिदेशात् ३४

© Dharmartha Trust J&K. Digitized by eGangotri

तस्यानन्यादेशिभावविरहात् तदुक्तं अर्थातिदेशोत्सिद्धमिति एवं तिष्यपुनर्वस्वोरित्यत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्वबहुत्वयोरभिधानमिति
बोध्यं संख्याप्रयोगे प्रतिषेधो वक्तव्यः एकस्मिन्बहुत्वातिदेशस्यैकशब्दप्रयोगेपि प्राप्तौ प्रतिषेधारंभः एको व्रीहिः संपन्नः सुभिक्षं करोतीति विकल्पः किं
व्रीहिरित्यपि यथा स्यात् तत्र संपन्नो व्रीहिरित्यादौ भिन्नव्यक्तिपरत्वेपि एकत्वं व्रीहित्वजातावन्वेति क्वचित्पदार्थतावच्छेदकपदार्थयोरन्वयस्वीकारादि
तिकेचित् अन्ये तु व्रीह्यादिपदशक्यतावच्छेदकतया व्रीहित्वादेः स्वरूपत एवोपस्थित्या अन्वयितावच्छेदकव्रीहित्वत्वेन रूपेणानुपस्थितेस्तत्र प
दार्थान्तरान्वयानुपपत्त्या स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसंबंधेन प्रकृत्यर्थव्रीह्यादावेवैकत्वान्वय इत्याहुः अपरे तु एकवचनेन नानैकत्वा
नामुपस्थित्या तेषां प्रत्येकं नाना व्रीहिष्वन्वय इत्याहुः नव्यास्तु नेदमुक्तं नह्येकत्वमात्रमेकवचनस्यार्थः वक्तृमात्रसाधारण्यापत्तेः अतएव त्वा
माद्यनुप्रयोगाच्च किंतु सजातीयान्तराहित्यविशिष्टं तच्च सजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपं साजात्यं च समभिव्याहृतप
दार्थसंबंधित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण तेनात्र घटोस्तीत्यादौ एतद्घटनिष्ठस्यैकत्वस्य घटान्तरनिष्ठभेदप्रतियोगितायां वस्त्वन्त
रत्वनिष्ठैकत्वस्य चैतद्घटनिष्ठभेदप्रतियोगितायामवच्छेदकतया घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः एतद्दे

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु०
३५
35

शाविद्यमानत्वविशिष्टघटनिषेधे स्वजातियोगितानवच्छेदकत्वस्य तद्घटनिषेधैकत्वएव प्रसिद्धेः तत्रघटांतरसत्त्वविवक्षायां तु तदप्रसिद्धमेव स्यात् अ
तएव पशुनायजेतेत्यादौ एकत्वस्याविवक्षितत्वात् तथागव्यक्तौ पश्वंतरव्यावृत्तिः वहुघटसत्वेघटोस्तीतिप्रयोगश्च जात्यभिप्रायेणासमर्थनीयः प
त्तुभावात्स्यात् तव हेत्वाप्येकत्वमविवक्षितमेव साधुत्वार्थत्वात् इति तन्न तत्रगत्यंतराभावेप्यत्र तदभावात् इत्याहुः प्रकृतमनुसरामः अत्र वार्त्तिकं अ
शिष्यो वा वहुवत्पृथगभिधानादिति जातिप्राधान्यविवक्षायामेकवचनस्य द्रव्यप्राधान्यविवक्षायां तु वहुवचनस्य सिद्धत्वात् सूत्रं नारम्भ्यमित्यर्थः अस्म
दः सविशेषणस्य प्रयोगे नेति वाच्यं देवदत्तोगार्ग्यायणः पंडितोयाज्ञिकोहं व्रवीमि त्वं राजा वयमप्युपासितगुरवः अभिमानोन्नतात्त्यादौ तु भवत्येव निषे
धस्यानुवाद्यविशेषणाविषयत्वादिति हरदत्तादयः॥ ॥अस्मदो द्वयोश्च एकत्वे द्वित्वे वा विवक्षिते अस्मदो वहुवचनं वा स्यात् वयं व्रूमः अहं व्रवीमि आ
वां व्रूव इति वा इदमपि भाष्ये प्रत्याख्यातं इदं मे अक्षि सुष्ठु पश्यति अनेनाक्ष्णाहं सुष्ठु पश्यामीति अर्थ तथा लोके प्रयोगदर्शनात् आधीश्चात्राख्यातस्य सं
योगादिव्यापारपरत्वात् अत्येवाश्रयपरत्वात् तथा च वयं पश्याम इत्यादौ वयमित्यनेनेंद्रियाणाममभिधानात् शरीरावच्छिन्नात्मापादहंकारोत्पादात् एकेंद्रि ए०
यवत्त्वाविंद्रियांतराणामौदासीन्येन संविधानात् तत्र एकत्वस्याविवक्षितत्वात् [illegible] रेतेत्वविवक्षायां त्वहमित्येकवचनं युष्मदस्मदोश्चैकशेषे अस्मद एवा ३५

© Dharmartha Trust J&K. Digitized by eGangotri

र्थं वा पामि वा पित्वात् द्विवचनं ॥ ॥फल्गुनीप्रोष्ठपदानां च नक्षत्रे ॥ द्वित्वे बहुत्वप्रयुक्तं कार्यं वा स्यात् नक्षत्रेर्थे उक्ते पूर्वे फल्गुन्यौ प्रोष्ठपदे चात्र उदिताः पूर्वाः
फल्गुन्यः प्रोष्ठपदाः नक्षत्रे किं फल्गुन्यौ माणविके इदमपि अस्मात् व्याख्याने तेषु प्रयुक्तं चेदं मासमादाय बहुत्वसंभवात् षष्ठिर्गोगच्छन्तीत्यादिवत् अमा
वास्यायामप्यादित्यमंडलप्रविष्टेन वं देशान् नक्षत्राणां योगात् एकस्यां तु तारायां फल्गुनीशब्दस्य प्रवृत्तेः पुष्यावन्ताविसादिवत् एकवचनं शिष्टप्रयोगस्य नियामक
त्वादेनानि प्रसंगः ॥ ॥तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं किं शाखयोः तिष्यपुनर्वस्वोर्नक्षत्रद्वंद्वे बहुवचनस्य द्विवचनं नित्यं बहुत्वं द्वित्ववद्भवति तिष्यश्च पुनर्व
सू च तिष्यपुनर्वसू तिष्येति किं कृत्तिकारोहिण्यः नक्षत्रे किं तिष्याश्च पुनर्वसू च माणवकाः तिष्यपुनर्वसवः न चात्र गोशालादेव बाधनं भवति इति वाच्यं
तिष्यपुनर्वसुप्रयुक्तकालु भवत्वेन माणवकेषु तिष्यपुनर्वसुशब्दस्य प्रयुक्तत्वात् न च तथापि पूर्वसूत्रादेव नक्षत्रपदलाभ इति वाच्यं कालार्थ कतिष्यपु
नर्वसुशब्दवारणार्थत्वात् बहवस्तिष्यपुनर्वसवो गताः कालं तिष्यो गतः एवं च नयोर्मध्ये देशांतरस्थमपि कार्यं नक्षत्रस्यैव स्यादित्येतदर्थं तेन ति
ष्यपुनर्वस्वोर्नक्षत्रारोपलोपः एवं अनेन तत्र पदं नोपादेयं ननु तत्र वा त्रपात उपादानेन कश्चिद्विशेष इति चेत् नहि यथा पापस्यापि अस्मात् द्विवचनं तिष्यपुन
र्वसू इति सिद्धं द्वंद्वेति किं यस्तिष्यः स एव पुनर्वसू येषां आत्मानां ते तिष्यपुनर्वसवः बहुकिति किं समाहारे मा भूत् उदितं तिष्यपुनर्वसु न चात्र प्रा

© Dharmartha Trust J&K. Digitized by eGangotri

रीनामिति पर्युदासाज्ज्ञातिप्रयुक्तैकवचनागानुपपत्तिः सर्वो द्वंद्वो विभाषयैकवद्भवतीत्यस्य ज्ञापकत्वात् तेन वाक्यवशाल्लंकायनं वाक्यवशाल
कायन इत्यादि सिद्धं तथा हि अप्राणिजातिद्वंद्वे नित्यमेकवद्भावः प्राणिद्वंद्वे तु विकल्पेन एकवद्भावप्रकरणे प्राण्यंगानां समाहार एव द्वंद्व
इति विषयविभागार्थमिति व्याख्यानात् तथा च तेन प्रकरणे न पाठानां चार्थे द्वंद्वः इत्यनेनैव इतरेतरयोगद्वंद्वे द्विवचनादि समाहारद्वंद्वे त्वेकवद्भा
व इति न्यायसिद्धेर्थे वडवचनग्रहणमपि लिंगसिद्धमिति सिद्धं तथा च समाहारे प्राण्यंगादीनामेव द्वंद्व इति तत्र विपरीतनियमवारणार्थमेवेदमिति तात्प
र्यम्॥ ॥इति श्रीसिद्धान्तसुधानिधौ प्रथमस्याध्यायस्य द्वितीयपादे द्वितीयमाह्निकं॥ ॥सरूपाणामेकशेष एकविभक्तौ व्याख्यान्तमपावत्त्यप्र
कृतिकानां येषां शब्दानां सारूप्यं तेषां शब्दानां मध्ये एक एव शिष्यते वृक्षौ वृक्षाः यद्यपि समानानामित्युक्तौ रूढत्वात् समानपदस्य तु ल्या
र्थत्वावगमे लाघवं सरूपाणामित्यत्र तु पदस्य पदार्थावगमपूर्वकान्यपदार्थावगमात् प्रतिपत्तिगौरवं तथापि शब्दार्थोभयरूपत्वसाम्यविवक्षा
यत्या हव्यहा इत्यादावेवैकशेषः स्यात् न तु अक्षाः पादा इत्यादौ अर्थभेदात् सं रूपमित्यत्र रूपग्रहणेन व्याकरणेर्थंगीकारस्यापि ज्ञापितत्वा
न रूपग्रहणेन तु शाब्दस्वरूपमात्रगतं तुल्यत्वं गृह्यत इति न दोषः नन्वेकग्रहणं व्यर्थं शेषशब्देनैव भावसाधनेन त्वपक्षे प्राधान्यादेकस्यैव शेष

© Dharmartha Trust J&K. Digitized by eGangotri

सिद्धेः शिष्यते शेष इति कर्मसाधनत्वेप्येकत्वस्याविवक्षितत्वादेकस्यैव शेषसिद्धेः नैवं आधेयाश्रित्यायादनेकस्यापि शेषापत्तेः द्विती
येपि अहं संमार्ष्टि इति अस्संस्कार्यसंख्याया अविवक्षितत्वात् अथ शेषग्रहणं यत्यर्थं सरूपाणामेकः साधुर्भवतीति वाक्यशेषस्याध्याहारेणान्तरे
तमस्यैकस्यादेशस्योपपत्तेः नैवं एकस्यादेशत्वप्रसंगात् षष्ठीस्थानेयोगेति नियमात् ततश्च अश्व अश्व श्वाश्वश्वाश्वो समुदायघटकयोर्द्वयोरश्वशब्द
योराद्युदात्तत्वादन्तेवानुदात्तत्वात् सर्वोदात्तस्य सर्वानुदात्तस्य वाश्वशब्दस्य प्रसंगात् उदात्तद्वयानुदात्तद्वयवतः समुदायस्य स्थाने तदन्यतरस्वत
स्वादेशस्यान्तरतमत्वात् अथैकविभक्ताविति किमर्थं नचपयः पयोजरयति वासोवासः छादयति आत्मनेराम्यांच कृतेआस्तनाम्भ्यांचदेहि इत्या
दावेकशेषवारणार्थमिति वाच्यं सहविवक्षायामित्यस्यावश्यकत्वात् अत एव इद इतोनुम्धातोरित्येकशेषाभावः संगच्छते परस्परविशेषणावि
शेष्यभावानापन्नानामेव तत्संभवात् बहुव्रीहौ तु वर्त्तिपदार्थानां विशेष्यविशेषणाभावसत्वात् वक्ष्यति हि वार्त्तिककारः नवार्थाविप्रतिषेधाद्यु
गपद्वचनाभाव इति युगपद्वचने सहविवक्षा यत्र शिष्यमाणो लुप्यमानार्थाभिधानसमर्थस्तत्रैवैकशेषः कर्तृत्वकर्मत्वसंप्रदानत्वाद्यश्वए
केन युगपद्बोधयितुमशक्याः युगपदेकस्याद्विभक्तिद्वयानुत्पत्तेः चतुर्थ्यन्तस्य शेषे ब्राह्मणोभ्य इत्युक्ते कर्तृत्वस्याप्रतीत्यां तस्य शेषे ब्राह्मणो हिनुते

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु० संप्रदानत्वस्यानवगमात् एकेनभिन्नेनवापरेणोपस्थितानां एकरूपेणैव प्रत्ययार्थान्वयादित्यर्थः मैवं तस्य सारूप्योपलक्षणार्थतायाव
३७ श्यमाणार्थत्वात् स्यादेतत् अनेकव्यक्तिबोधयिषायामनेकशब्दप्रयोगप्राप्तेतन्निवृत्त्यर्थताद्यमारम्भः ततश्च विरूपानेकशब्दप्रयोगस्यध
37 वखदिराविव्यादौदर्शनात् सरूपैकशेषारंभवत् वक्रतारूढत्यादौ सरूपैकशब्दप्रयोगदर्शनाद्विरूपाणामनेकशेषइत्येव सम्पत्तौ दृष्टांतमात्रस्य हे
त्वभावस्यचोभयत्रसाम्यात् प्रयोगानुसरणेतुनकिंचिद्वारकत्वं व्यक्तिपक्षेपिएकस्याविशिष्टस्यैव कार्यबोधकत्वसंभवादन्यथैकशेषारंभेप्यनिर्वाहा
त् प्राकृताकोर्वचनेमूलकत्वाभावात् किंच सरूपैकशेषेगौरवं द्वयोरेकशेषेएकस्ययदात्रयाणामेकःशिष्यते तत्तदाद्वयोरनुवादीनामेकशेषे
आदीनांनिवृत्तिरेकस्यचप्रवृत्तिर्वाच्येत्यतिप्रवृत्तिनिवृत्तिनिवृत्तिलक्षणविषयभेदाद्धिर्गौरवापत्तेः शेषशब्दस्यनिवृत्तिविशिष्टावस्थानवाचि
त्वात् विरूपानेकशेषारंभेतुप्रवृत्तिविषयावृद्धिरेकरूपैवेतिलाघवं उच्यते हस्तोपदेनैतद्वावेकशेषस्यैवविधेयत्वात् इत्थंत्वनेकशेषविधानेम
स्थानक्षयायत्वात्लाघवादेकशेषस्यैवयुक्तत्वात् इदंत्ववधेयं एकपदस्यपूर्वोक्तरीत्यासजातीयांतरराहित्यार्थकतयाशब्दांतरनिवृत्तिरेवविधीय राम०
ते अवस्थानंतुसिद्धत्वादनूद्यते अतएवकैयटेनप्रवृत्तिलक्षणविषयभेदादित्युक्तं आपाततोद्ध्यागृह्णातीत्यादिवदवस्थानस्यापिविधेयत्व ३७

© Dharmartha Trust J&K. Digitized by eGangotri

तीतेः निवृत्तेरेव सिद्धत्वान्नैवैशिष्ट्यं वा निवर्त्तमानपदसमभिव्याहाराभावरूपं प्रतियोगिप्रसिद्धिश्चेद्रूपमाणे तेषु तदसमभिव्याहृतेनशब्दांत
रस्याप्येवं चालौकिकप्रक्रियावाक्यमेव गम्यमुल्लभा स्यादेतत् यत्र पक्षाः संभवंति तथाहि समुदायादेव विभक्त्योत्पत्त एकशेषो विधीयते
एकशेषस्य संख्यावाचित्वेन प्रसिद्धत्वात् ननु प्रत्यासत्तिपदिकादित्यत्रैकवचनांतानामेव द्वंद्वः क्रियते इति पदार्थानां सर्वत्रैकत्वमानसौत्सर्गिक
त्वात्. यो ब्राह्मणीराः इत्यादौ प्रत्यादेशादिवत्तादेव बहुत्वादिप्रतीतेः तथा चैकत्वस्य विवक्षितत्वादेकस्मादेव प्रातिपदिकात् स्यादयो ननु समुदायात् क
तुरीणि नतममित्यादौ द्वयोर्बहूनां वार्द्धितस्य कर्मसंज्ञादर्शनाद्द्वित्वस्यानुरोधान्नसंख्याविवक्षेति वैषम्यं तथा च समुदायादेकस्याविभक्तेः प्राभा
वादसंभव एव तदुक्तं एकविभक्तावितिचेत्रा भावाद्विभक्तेरिति मेवं स्वार्थमादायपदयोरिव परस्परापेक्षायां सत्यां समुदायार्थस्याथवय
वार्थातिरिक्तस्यानुभूयमानत्वात्मादायसमुदायस्याप्येकप्रातिपदिकत्वाद्विभक्त्युपपत्तेः नचार्थवत्समुदायानां समासग्रहणं नियमार्थमिति
वाच्यं तस्य सजातीयविषयकत्वात् सुबंतानामेव प्राप्तेः राजदृषदित्यादावुपपदादिसमासेपि पूर्वपदस्य नलोपादिपदकार्यानुरोधेन सुबंतत्वान्
तथा चैकार्थद्विर्वचनन्यायेन समुदायादेव द्विवचनाद्युत्पत्तिः तेनैवावयवार्थानां संख्यान्वयात्मकानुग्रहसंपत्तेः न च राजन्तराद् श्रौ इत्यत्र

© Dharmartha Trust J&K. Digitized by eGangotri

सि० सु० परत्वान्नित्यत्वाच्चोपधादीर्घे कृते वैरूप्यादेकशेषो न स्यादिति वाच्यं विरूपाणामपि समानार्थानामिति तत्संभवात् यद्वान्तरंगत्वादेकशेषः संबुद्धि
३८ भिन्नसर्वनामस्थाने रूपविभक्तिविशेषं उपधां चापेक्षमाणस्य दीर्घस्य बहिरंगत्वात् न चैवं द्वंद्वेऽपि द्वंद्वं विनैव समुदायाद्विभक्तिप्रसंग इति वाच्यं
38 तद्विधावनेकं सुबंतमित्यनुवृत्त्याऽकृतत्वाद्यबाधात् तथा च राजसख्यौ इति स्थिते एकशेषनिवृत्तिरित्येकः पक्षः यदा पृथग्विभक्तौ परत एकशेषः ननु वृत्र
हन् हन्स् इति स्थिते विभक्तौ परतः सरूपाणामेकशेष एकविभक्ताविति भिन्नकर्तृत्वाद्रूपनिवृत्तौ तदुत्तरविभक्तेः केवलोपः प्रयोगः स्यात् न चैकैकलोपयोः प्र
कृतिमत्त्वपयोः प्रयोगनिषेध इति वाच्यं तयोः परस्परलोपप्रयोजकत्वे अग्निचित्पत्नीत्यादौ परस्पराहित्येऽपि प्रयोगदर्शनात् न चान्येषां सकारसंयोगान्तलोपेन निस्तारः संयोगान्तस्य पदं तदन्तस्य तद्विधानात् वृत्रहन्स् स् इति स्थिते वृत्रहन्स् इत्येके सयति द्वितीयं स् इति तृतीयं पदमिति कस्यापि पदस्य सं
योगान्तत्वाभावात् एतेन संयोगान्तलोपोऽपि परास्तः मेवं संयोगान्तलोप इति भाष्यस्य संयोगस्यान्ते सकार इत्यस्य लोपः स च हल्ङ्याब्भ्यो दीर्घात्सुतिसीति
व्याख्येयत्वात् इति द्वितीयः अथवा समासादेकविभक्तौ परत एकशेषो स्त्र प्रथमस्त्वाद्वंद्व इत्यनुवृत्तेः तथा चेह सख्यु वृत्रहन्त्रिति द्वंद्व स्त्र वक्ष्ये त्र एम०
त्रैकशेष इति तदुत्तरविभक्तेः सुपो धातुप्रातिपदिकयोरिति लोपात् न च व्यापत्तिरिति तृतीयः यद्वा पृथक् सर्वेषां विभक्तौ नैकशेषः एकविभक्तौ न ३८

© Dharmartha Trust J&K. Digitized by eGangotri

मिति न्यासाश्रयणात् सप्तमीनिर्देशो हि प्रकृतिमात्रनिवृत्तौ प्रत्ययश्रवणप्रसंगः औरीत्यादिविभक्त्यन्तानामेव निवृत्त्या नेति चतुर्थः ४ अथवा प्राति
पदिकानामेवैकशेषः तथा हि एकविभक्ताविति न क्रियते कृत्तो नपुंसकइति स्त्रीप्रातिपदिकग्रहणमनुवर्तिनीनुतत्त्वात्प्रामेव विभक्तौ सरूपाणां
प्रातिपदिकानामेकशेषो विधीयते तिङ् तेष्वपि पचतु पचतु इति स्थिते कृदन्तत्वात्प्रातिपदिकसंज्ञायां न दुपपत्तेः तथा च लुप्यमानप्रकृतिकविभक्ति
श्रवणस्यनापत्तिः न च प्रातिपदिकमात्रसारूप्यविग्रहायां जननीपरिच्छेत्तवाचिनोरपि मातृशब्दयोरेकशेषापत्तिः विभक्त्यन्तानामेकशेषपक्षेऽपि
तुल्यत्वात् क्वचिद्विभक्तौ सारूप्यसत्त्वात् न च प्रातिपदिकावस्थायां सारूप्यस्य सार्वत्रिकत्वात्सर्वत्रैकशेषापत्तिः विभक्त्यन्तानां सरूपाणां एकशेषे तु य
स्यात् तृतीयादिविभक्तौ सारूप्यं तत्रैकशेषो न तत्रैव तिरश्चां अर्थविप्रतिषेधात्तत्राप्येकशेषानापत्तेः मातृशब्दयोरेकशेषेतामभिरित्यत्र प्रकृत्येपुमर्थस्य तैरित्यु
क्ते च स्वार्थस्यानवबोधात् इति पंचमः यथा द्विवचनबहुवचनोत्तानामेकशेषः युगपदधिकरणविवक्षायां चैकैकस्य परस्परार्थरूपबोधकत्वात् ह
क्षावित्यादौ द्विवचनादिसिद्धिः न चैवमेकशेषेणानित्येन वृक्षश्च वृक्षश्चेति वाक्यबाधापत्तिः ६ तत्र नाद्यः भिक्षाणां समूहो भैक्षमित्यादेरसिद्धेः तथा
हि भिक्षा भिक्षा भिक्षा आम् इति स्थिते सर्वविधिभ्यो लग्विधेर्बलवत्त्वादामो लुकि कृते एकशेषो न स्यात् विभक्तिपरत्वाभावात्

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु० ३९ नच प्रत्ययलक्षणं नतु मतां गस्येति तन्निषेधात्ः रामरामश्चौ इत्यत्रापि परत्वाद्द्वंद्वे हेत्वभावादेकशेषो न स्यात् नचानारंभवादे न विभक्तेः परा
त्वमिति वाच्यं उभयत्रत्राप्यप्रत्यये तन्निषेधात् नद्वितीयः द्विवचनवद्बहुवचनार्थं द्वंद्वप्रतिषेधार्थं चेद्वचनांतरारंभापत्तेः नचानवकाश एकशेषो द्वंद्वबो
39 धकः तिङंतेषु एकशेषस्य सावकाशत्वात्; द्वद्वितीयः द्विवचनवद्बहुवचनार्थं द्वंद्वप्रतिषेधार्थं च वचनांतरारंभापत्तेः नचानवकाश एकशेषो द्वंद्व
कारकभेदेन क्रियाभेदादनेकतिङंतप्रसंगात् नतत्त्वपरत्वात्द्वंद्वःस्यात् नचतद्वत्तरमेकशेषः सकृदुक्तौ विविक्तत्वापातात् पुनः प्रसंगविज्ञानेपि
वक्ष्यमाणरीत्यावरसमासांतेषु दोषप्रसंगात् ह्येते सवृक्षसद्दश्यत्र पूर्वस्यापि हृक्षेश वृद्धस्य पाक्षिकनिवृत्तिप्रसंगे सवृद्धावित्यापत्तेश्च परस्येवा
नवृत्तेर्नियामकाभावात् एवं च द्वंद्वेपि योज्यं नच संयोगादिलोपेन सिद्धिः एकपदसंबंधीयः संयोगस्तदादेर्हलो त्राभावात् सस्रइत्यनयोः प्र
त्येकंपदत्वात् इदं चोपलक्षणं परनिवृत्तावपि पूर्वोक्तस्य हल्ङ्यादिलोपस्यानुपपत्तेः सुतिसीति प्रत्ययैः प्रकृत्याद्देपात् हल्लेतायाः प्रकृ
तेः परेषामेव स्वादीनां लोपविधानात् एवं गोदो दाराः सिकता इत्यादीनां नियतवचनानां यत्रैकशेषस्तत्र हल्ङ्याद्यादिलोपादेर्दुःशकत्वं किंतु मप्यशक्य ए०म०
त्वाच्च एतेन संयोगांतस्य पदांतस्येति पक्षो प्यपेरणापि निर्वाहो न संभवतीति दिक् एवं शिष्यमाणप्रातिपदिकोत्तरविभक्तिश्रवणप्रसंगश्चेत्य ३९

© Dharmartha Trust J&K. Digitized by eGangotri

वधेयं नापि द्वितीयः तदुक्तम् समासइतिचेत्तर्हि समासांतेषु दोषइति तथाहि अक्ष्णश्चाक्ष्णश्चेति द्वंद्वे समासांतोदात्तत्वे शेषविघाने च
यदि पूर्वशेषः तदा सर्वानुदात्तत्वापत्तिः अथ परशेषः तदांतोदात्तत्वप्रसंगः परत्वादेकशेषं वाधित्वा समासांतोदात्तत्वप्रवृत्तेः नच येननाप्रा
प्तन्यायेनैकशेषः समासांतोदात्तत्वापवाद इति वाच्यं तदुत्तरमप्येकशेषप्रवृत्तिसंभवाद्विरोधाभावाच्च एवं कृते अक्ष्णु अक्ष्णु अ इति स्थिते अंतर्वर्ति
न्या विभक्तेर्लुका लुप्तत्वात् प्रत्ययलक्षणप्रतिषेधाच्च विभक्तिपरत्वाभावादेकशेषार्थं समुदायादन्या विभक्तिरुत्पाद्या तस्यां च नत्वि सा
रूपं एको द्विशब्दः अपरश्च शब्दः नच समासांतः समासस्यैवावयवो न तूत्तरपदस्येति वाच्यं समासांतकृतव्यवधानेन विभक्तिपर
त्वाभावादेकशेषानापत्तेः नन्वेवमेव दोषो वक्तव्यो न त्वसारूप्यमिति वाच्यं समासार्थस्योत्तरपदस्यावयवः समासांत इति पक्षमाश्रि
त्य तथोक्तत्वात् एवं सुसखसुसखौ चेति अत्र परत्वाद्गुणदीर्घयोः कृतयोः सारूप्याभावादेकशेषो न स्यात् एवं चेनौपूर्वणावौ वै त्याद
वंतंगकार्ये अभावादेकादेशविधौ रूपं तथाहि यद्यंतर्वर्तिन्या विभक्तेर्लुका लुप्तायामपि विवचने सामर्थ्यात्प्रत्यये लेहे रां श्री श्रीपतेतरात्र वैरूप्य
अथ समासविभक्त्यैकविभक्तिपरत्वं तथापि वैरूप्यमा द्विवस्थं एवं आरवान्तमारभ्यते नेत्यत्र प्रकारेण द्वंद्वश्च सरूपाणामिति वचनेन कल्पनीयं

© Dharmartha Trust J&K. Digitized by eGangotri

अन्यथातिङन्तानामेकशेषानापत्तेः नापि चतुर्थः लुप्यमानानां प्रत्ययेन सहैव निवृत्तावपि शिष्यमाणप्रकृतिकप्रत्ययस्य श्रवणापत्या तन्त्रोप
विभानस्य द्विवदुक्वचनविधानस्य तत्प्रतिषेधवचनस्य चारंभणीयत्वात् नापि पंचमः भैक्ष्यमित्यस्यासिद्धेः समर्थस्य पत्युः प्रातिपदिकं तस्मा
त् नद्धिताद्त्यावेतादरिण इति पदत्वादादिवृद्धौ कृतायां वैरूप्यादेकशेषानापत्तेः हरितस्य स्त्री हरिणी एवं हरिणस्यापि हरिणी च हरिणी च
हरिण्याविति एकशेषानुपपत्तेश्च प्रातिपदिकावस्थायां वैरूप्यात् एकस्य ङ्यो रोहिण्यादिवत्त्वादपि यद्यपि हरितशब्दात्तु पोगेङीना हरिणीति रूपं त
थापि हरितशब्दस्य स्त्री हरिणी स्त्रीप्रत्ययान्तो हरितशब्द इति यावदिति कैयटः प्रातिपदिकग्रहणस्य विशिष्टवृत्त्यात् तेन च प्रातिपदिकानां लो
के प्रयोगाभावात्तान्त्प्यस्य पदान्तर्भावे शोव ग्रहणात् तदुक्तं न वा पदस्यार्थे प्रयोगादिति नापि षष्ठः अजहत्स्वार्थायां वृत्तौ पदद्वयस्यानर्थ
कत्वात् एकैकस्यानेकार्थाभिधायित्वानुपपत्तेः अजहत्स्वार्थवृत्तिपक्षेपि प्रथमप्रवृत्तस्यैकवचनस्य त्यागायोगात् अन्यथा षष्ठीत
त्पुरुषाद्ययोगात् तत्रापि पूर्वपदस्योत्तरपदार्थे उपसंक्रमे राषष्ठ्याप्ययोगात् तदुक्तं न वा पदस्यार्थे प्रयोगादिति नापि षष्ठः अजहत्स्वा
र्थायां वृत्तौ पदद्वयस्यानर्थकत्वात् एकैकस्यानेकार्थाभिधायित्वानुपपत्तेः अजहत्स्वार्थवृत्तिपक्षेपि प्रथमप्रवृत्तस्यैकवचनस्यत्यागा

© Dharmartha Trust J&K. Digitized by eGangotri

त तथा च भाष्यं सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा चेति। एतद्वृत्तिनीयेऽस्मद्यं पिष्यामः तस्मात्त्वदुपपद्यते दुष्टा एवेति श्री
सिद्धांतमाह भाष्यकारः प्रातिपदिकानां चैकशेषः सिद्धं इति तथा हि एकविभक्तिर्नैकशेषे निमित्तं किं तर्हि सारूप्योपलक्षणं
एकविभक्तौ लौकिकप्रयोगे यानि सरूपाणि दृष्टानि तेषामेकशेषः सेयं नैमित्तिकत्वाद्विभक्तिं नापेक्षते इत्यंतरंगत्वात्सुबुत्पत्तेः
प्रागेव प्रवर्त्तते भाष्ये प्रातिपदिकग्रहणं चोपलक्षणं तेन हरिणपादीनामपि नास्ति सिद्धिः स्वरभिन्नानां यत्परं तदुच्छ्यात् इति वचनात् की
र्तनस्य हरिणीशब्दस्य शेषः केचित्तु हरितहरिणशब्दयोरेवैकशेषेऽप्ययवा विते प्यन्यतरस्य वर्णाभावाच्चित्वंवाप्रित्य लोप्रत्ययपाद्धः ते
षां पदानां स्वरभेदस्य असंग इति कैयटः भैक्षमित्यादावप्यनैमित्तिकत्वेनांतरंगत्वात्सर्वमेकशेषस्ततोऽहंविपर्य्येकशेषो न रमेवतद्धितोत्पत्ति
रिति न दोषः तस्मादयमत्रार्थः विभक्तिपदमत्र स्वादिमात्रपरं सप्त्याश्रयभेदेन क्रियाभेदेऽनिवर्त्तमेभेदाः एवमस्यास्तिङन्तेन वैधात
प्रकर्षाभावात्त्वादीनां च साश्रयाभ्यामहत्यादिनिमित्तकत्वात् प्रवर्तते इत्यादि द्विवचनादीनां च कार्यादिनिरूढं तथा प्रातिपदिकेलो
ते नव कर्त्तृकर्मणोर्विशिनष्टि स्पष्टकारस्य पंडूर्दादूर्दस्य वृक्ष इति वाच्यं दृष्टापत्तेः लक्ष्येऽप्यत्र लत्वं गोनेराश्रवणादनेकेषामपि लक्षणां

© Dharmartha Trust J&K. Digitized by eGangotri

सि०सु० ४२

५१

स्थाने ऽर्थतन्त्रत्वात् पर्यायतद्धिवचनबहुवचनयोः प्रवृत्तेः एकपदं च समानार्थकं सजातीयार्थकं साजात्यं च न विभक्तित्वेन विभक्तिपदादेव
सिद्धेस्तदुपादानस्यापि वैयर्थ्यापत्तेश्च विभक्तित्वावच्छेदेन सारूप्यस्यासंभवादेवाऽविवक्षणीयत्वात् नतु सामानाधिकरण्यमात्रेण सा
रूप्यस्य च सरूपपदोपादानेऽस्वलाभात् किंतु विभक्तित्वव्याप्येन सुत्वादिना न तु प्रथमात्वादिना । ह्रस्वः वृक्षो वृक्षाः इत्यादावपि सारूप्याभा
वात् तस्यपावशाच्च प्रकृतपर्यन्तावच्छेदके सुत्वादिधर्माणां यावत्त्वं गम्यते तादृशयावत्किंचिद्धर्मावच्छेदेन सारूप्यस्येत व्यतिरेके रामौ इत्यसिद्धेः अत्र
वच्छिन्नत्वं च समनियतार्थः तथा च विभक्तित्वव्याप्या यावन्तः सुत्वादिधर्माः प्रत्येकं तदवच्छिन्नप्रत्ययव्यक्तिषु सारूप्यमित्यर्थः सुत्वादिर्यावद्धर्मा
वच्छिन्नायाः एकस्याः प्रत्ययव्यक्तेः असिद्धत्वात् प्रत्येकमित्युक्तं सुत्वाद्यवच्छिन्नप्रत्ययव्यक्तिनिष्ठसारूप्यवारणाय यावदित्युक्तं तेन गेहे नरीपरिच्छे
त्वा विनोमीत् शब्दयोर्नैकशेषः श्रीहस्याद्यपकरूपस्यर्षत् सारूप्याभावात् एतेनोत्तरस्त्र वस्रस्येव कारस्येन कर्षणात् सरूपाणामेवेत्यर्थो ल
भ्यते इत्यपास्तं ऋकारीत्येव तदभावात् न त्वेवं नियतवचनानां दाराश्च दाराश्च दाराश्चेत्यादीनामेकशेषो न स्यात् मैवं यावत्प्रत्ययव्यक्तौ प
स्मात्संभवतीति तदवच्छेदेन सारूप्यस्याविवक्षितत्वात् इति दिक् स्यादेतत् गर्गा इति न सिध्यति अपत्यत्वेन त्वेहि पत्रोपि वह वतत्पाद्याः

एम० ४२

© Dharmartha Trust J&K. Digitized by eGangotri

त्पर्यंशार्थनिवेशादन्यथैकशेषवैयर्थ्यात् नचद्वितीयादीनां यञां प्रकृतेः परत्वं नस्यादितिवाच्यं यञा प्रकृतेरेकत्वाद्व्यवधानाभावात् तत्रापि ग
र्गयपद इति स्थितेप्यथ प्रयञः प्रकृतिसन्निपातकृतत्वेन तस्मादेकशेषो नस्यात् एवं विभक्तिनिमित्तकत्वपक्षेपि समुदायस्यतेद्वितांतत्वात्प्राति
पदिकसंज्ञायां एकविभक्त्युत्पत्तौ गौधं सहविवक्षायां विभक्त्युत्पत्तिनामेकशेष इतिपक्षेपि गर्गायञ्स गर्गास इति स्थितेप्येवं नच प्रकृत्यंशविवक्षा
यपशब्दानां सारूप्यात्तदुपपत्तिः प्रकृतिविशिष्टसमुदायादेव विभक्त्युत्पत्त्यात द्वन्द्वेपि नसारूप्याश्रये एकशेषे विभक्तिवदिति भावः स्यान्नुचितत्वा
त् यञां प्रकृत्यर्थानपेक्ष्य समुदायानभिधायित्वाच्च नचैकैकस्य प्रत्ययार्थस्य प्रकृत्यर्थेन योगात्प्रधानापत्यावगुणत्वेपि प्रत्ययार्थस्य गार्गश
ब्दानामपि बहुत्वाद्गार्ग्यशब्दानामेवैकशेष इतिवाच्यं तद्राजस्येव बहुष्वितियलोपानुपपत्तेः बहुष्वेतेष्वर्थगादेरेव तद्विधानात् तस्य यञामेक
शेष एव शिष्यमाणायञो बह्वर्थकत्वादुपपत्तेः उक्तरीत्या तु यञन्तस्यैव बह्वर्थकत्वात् मैवं तत्प्रकृतेर्बहुत्वे तस्यापि तत्प्रकृतेर्बहुत्वे तस्यैव व्या
ख्यानात् नचैकस्मिन्नेकस्य पायत्येः जिह्नतेतस्मादिवेयतिकृतौ कनू गौविकार्थे चापरापद इतिनस्य बहुकृपविकृतिबहुत्वेविवक्षायां काश्य
पादस्यत्रापि लुक्स्यात् अञन्तस्य बह्वर्थकत्वादितिवाच्यं अपत्यबहुत्ववाचिन एव लोपविधानात् अस्य च प्रातिकृतिबहुत्ववाचित्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

त्रि० सू०
५२
42

यदा एकस्मादेव गर्गशब्दात्परेषां बहूनां यञां सत्यपि प्रकृतिसन्निपातकृते वैरूप्ये सर्वेषां प्रकृत्यर्थविशिष्टापत्याभिधायित्वादिरू
पाणामपि समानार्थानामित्येकशेष इति सिद्धं यद्येतत्सूत्रं न स्यात्तर्हि प्रत्येकं विभक्त्युत्पत्तौ द्वंद्वः स्यात् सति त्वनेकसुबंताभावान्न त
त्प्रसक्तिः एतेन द्वंद्वापवाद एकशेष इति व्याख्यातं ननु पदार्थतावच्छेदकभेदे द्वंद्व इति पक्षे घटश्च घटश्चेति द्वंद्वस्य न प्रसंग इति चेत् न प
दार्थभेदे द्वंद्व इति पक्षे संभवात् यथा सीहत्यत्रेजलत्वेक्यत्वत्वरूपपदार्थतावच्छेदभेदसत्वाच्च स्यादेतत् एकश्च एकश्च द्वौ च द्वौ चेत्येकशेषः स्या
त् अत्र वार्तिकं संख्यायाश्चार्थासंप्रत्ययादन्यपदार्थत्वाच्चानेकशेष इति यत्रैकः शब्दोनेकार्थाभिधानसमर्थः तत्रैवैकशेषः प्रयुक्तानामे
वान्वाख्यानात् एकादिस्तु केवलसहायादेरेवार्थप्रतीत्या द्वित्वप्रतीत्यभावात् अन्यपदार्थत्वाच्चेत्यस्यासंदिग्धेन पदांतरेण द्वावित्यादिनैव त
दर्थः प्रत्याय्यत इत्यर्थः एतेन त्रिद्वंद्वो यापि नास्ति तदभिधानात् ननु गार्ग्यावित्यत्र गार्ग्यश्च गार्ग्यश्चेति सरूपैकशेषस्यापि संभवात् सरूपार्थासं
प्रत्ययेपि एकशेषो दृश्यते उत्तरकालं प्रकरणादिना संदेहनिवृत्तेः नैवं तत्र वृद्धो यूनेत्यारंभसामर्थ्यान्न तथा अत्र त्वसंदिग्धविशेषसंभवा
न्नेति वाच्यं अत्राहुः स्यादादावप्यप्रवृत्त्यापत्तेः मैवं अर्थासंप्रत्ययेत्यस्यान्यपदार्थत्वादिति विशिष्टस्य हेतुत्वात् अत्रेदं तात्पर्यं यत्पदार्थतावच्छेद

एम०
५२

© Dharmartha Trust J&K. Digitized by eGangotri

कावच्छिन्नं द्वित्वादिपर्याप्त्यधिकरणं तत्पदयोरेकशेषः एकत्वावच्छिन्नं तु न द्वित्वाद्यपर्याप्त्यधिकरणं ननु घटत्वाद्यवच्छिन्नमपि प्रत्येकं न तथा मिलि
तं त्वेकत्वावच्छिन्नमपि न तथेति तुल्यं न च तत्र पदार्थतावच्छेदकं घटत्वादिकमुभयत्राप्यभिन्नं एकत्वं तु प्रतिव्यक्ति भिन्नमिति गाढं पयसीत्यादाव
पि जलत्वदुग्धत्वरूपपदार्थतावच्छेदकयोः सामानाधिकरण्याभावात् नैवं घटपदार्थतावच्छेदकं प्रत्ययार्थसंख्यानिष्ठप्रतियोगितावच्छे
दकताकभेदप्रकारतानिरूपितविशेष्यतावच्छेदकयोः सामानाधिकरण्याभावात् नैवं घटपदार्थतावच्छेदकं प्रत्ययार्थसंख्यानिष्ठप्रति
योगितावच्छेदकताकभेदप्रकारतानिरूपितविशेष्यतावच्छेदकं न भवतीति तत्पदयोरेकशेषः एकत्वे तु एको द्वित्ववान्न इति प्रतीतौ विशेष्य
तावच्छेदकमेव पर्याप्तिसंबंधस्य प्रतियोगितावच्छेदकत्वलाभाय प्रत्ययार्थे युक्तं एकघटे घटाविति प्रयोगाभावेन विभक्त्यर्थद्वित्वादेः पर्याप्त्ये
वान्वयस्याव्युत्पन्नत्वात् एको द्वित्ववानित्यत्र तु द्वित्वमाश्रयत्वमात्रेण विशेषणं न तु पर्याप्त्येति न दोषः घटो द्वित्ववान्नेत्यत्रापि एकत्वमेव प
योक्तभेदप्रकारतानिरूपितविशेष्यतायामवच्छेदकं न तु घटत्वं घटेन क्वापि विभक्तिप्रयोगाभावात् अत एव चैत्रो मैत्रश्चागच्छत इत्यत्र प्रत्येकमे
कत्वान्वयेऽपि चैत्रत्वे धर्मितावच्छेदकीकृतेऽवश्यमाख्यातार्थद्वित्वान्वयधीनेत्येकत्वमपीत्यदोषः एवं द्विशब्दादावपि योऽयं प्रक्रान्तमनुसरा

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰सु॰ मः एकार्थानामपि विरूपाणामेकशेषो वक्तव्यः वक्रदण्डश्च कुटिलदण्डश्च वक्रदण्डौ कुटिलदण्डौ वा। सरूपाणामित्यनेन समानार्थकस्यापि सं
४३ ग्रहात् स्वरभिन्नानां यस्योत्तरस्वरविधिस्तस्यैकशेषो वक्तव्यः स्वरेणाभिन्नानां भिन्नस्वराणामिति यावत् अक्षश्चाक्षश्च अक्षौ एकोऽक्ष
43 शब्दोऽशेर्देवन इति सप्रत्ययान्तत्वादन्तोदात्तः द्वितीयस्तु घञन्तत्वादाद्युदात्तः इति तस्य विशेषः मीमांसकौ एको मीमांसकशब्दो ण्वुलन्तत्वान्मध्यो
दात्तः अपरस्तु मीमांसामधीते इति क्रमादिभ्यो वुन्निति आद्युदात्तस्तस्यैकशेषः इदमप्यवधेयं घटावित्यादौ पदार्थतावच्छेदकसामाना
धिकरण्येन द्वित्वं प्रतीयते अक्षावित्यादावपि पदार्थतावच्छेदकयोर्विभीतकत्वदेवनत्वयोः परस्परसामानाधिकरण्याभावेऽपि प्रसेकतदधि
करणयोर्द्वयोर्द्वित्वान्वये द्वित्वेन सह तयोः सामानाधिकरण्यमप्याहत्य पदार्थतावच्छेदकयोः परस्परसामानाधिकरण्यप्रत्ययस्यानुभवसिद्ध
त्वाभावात् प्रयोजनाभावाद्घटावित्यादावसंभवाच्च एकशेषस्थले चेत् अक्षपदमेव एकपदार्थतावच्छेदकप्रकारत्वविशिष्टापरपदार्थताव
च्छेदकप्रकारकज्ञानजनकं अनुभवानुरोधात् तथा चानार्थस्यैवैकशेषः एकेनैव तादृशार्थबोधसिद्धेस्तथा तदारंभे प्रयोजनाभावात् न एम॰
हि स्वतोऽसतीं शक्तिं राजाज्ञया कर्तुं शक्यते शक्तेश्च लोकप्रयोगमात्रकल्प्यत्वात् न चैवमग्निचित्सोमसुदित्यादौ क्विबन्तोपादस्यापि वै ४३

© Dharmartha Trust J&K. Digitized by eGangotri

यथर्थप्रतीतिः प्रत्ययलक्षणादेस्तत्प्रयोजनत्वात्· एकशेषस्य च प्रक्रियायामुपयोगविरहात्· न चैकेन शब्देन कथमनेकार्थाभिधानमिति
वाच्यं तुल्यत्वात् हेतिविषयत्वावच्छेदकावच्छिन्नस्य बोध्यत्वात्· एकद्विबहूनामर्थानां द्वये· गोदौ दाराः इत्यादिशब्दे हेतिविषयत्वस्यावि
शेषात् न चैवं लक्षणया बोधाविनाभावविरहविवक्षायां समर्थाया अर्थद्वयोर्भावादेकेनैवार्थद्वयबोधाद्द्वितीयप्रयोगो न स्यादिति वाच्यम्; लक्ष्या
वित्युक्ते लक्ष्यांतरे शक्यत्वप्रतीतेः· क्वचिद्विरूपेणाप्यर्थद्वयाभिधानदर्शनाच्च यथा द्यावाचिदस्मै पृथिवी नमेते इति· द्योशब्देनात्र
द्यावापृथिव्योरभिधानं ओकारस्य सुपां सुलुगित्याकारादेशः गोतो णिदित्योकारांतत्रहणात् त्रालभ्याद्विःस्तत्त्वं वाचेशः पृथिवी
ति द्विवचनांतं वा छंदसीति पूर्वसवर्णदीर्घः पृथिवीपदेन द्विवस्य पृथिव्योरभिधानं तथा च प्रकरणादिवशाद्यत्रार्थविशेषनिर्णयस्तत्र प्रव
त्तिनिमित्तभेदेऽपि विरूपस्याप्यनेकार्थाभिधायित्वदर्शनात्सरूपस्य सुतरां तदुपपत्तेः· एतेन नानार्थानुरोधादेकशेषारंभ इत्यपास्तं उक्त
रीत्या एकेनैव शब्देन तावच्छेदकप्रकारकधीसंभवात् न च ह्वारणार्थमयमारंभः; अनभिधानादेव तत्सिद्धेः न देवं पदद्वयेपि सत्वेप्र
त्याख्यानं अत एव सरूपेति ज्ञात्या व्याप्यामिति वहत्रयो भर्त्स्या कृता प्रत्याख्यासमानत्वेपि लत्वानुरोध एव पृथक्पाठ्यपेवीजमित्युक्तं कौ

© Dharmartha Trust J&K. Digitized by eGangotri

सि० मु० क्रमेणपरस्पराणां एवं च पदार्थतावच्छेदकैक्यस्थलेऽभिमताऽनुग्राहकवार्त्तिककारः आकृत्यभिधानाद्वैकं विभक्तौ वाजप्यायन इति सूत्रा
४४ भिमतापवर्गं न मात्रार्थं वार्त्तिकान्तरं द्रव्याभिधानं व्याडिरिति जातिव्यक्त्योः पदार्थत्वे तारतम्यं विप्रतिपत्तिविषयस्तत्र निरूपयिष्यामः जातिसद्भावे
प्रमाणमाह अत्व्याः विशेषादिति अत्व्यापापुञ्ज्ञविशेषादेकरूपत्वात् भिन्नव्यक्तिविशेषकयोरपि गोरित्याकारकयोर्बुद्ध्योर्द्वयोः
समानप्रकारकत्वानुभवात् एवं चैकत्वमपि जातेर्धर्मिग्राहकमानसिद्धं लाघवेन नित्यत्वे कल्पनान्तरं नाश्रयनाशनाश्यत्वे न चैक
स्या जातेर्युगपदनेकव्यक्तिषु कथं भवत्तिरिति वाच्यं तस्या अपि धर्मिग्राहकात्सिद्धेः यत्तु एकं द्वीनेकास्मिन्क्रान्तशतेभ्यो ह्यतो युगपत्सर्वत्र।
भवतीति भाष्यं तदप्युपमात्रं कात्स्न्यैकदेशविकल्पेन तदुपपत्तेरुत्तरमीमांसायां निरूपितत्वात् अचेतनदेवतापदेन सन्निधानस्यैवाङ्गीकारात्
ननु गोत्वं व्यापकमवश्यं वाच्यं अन्यथा उत्पन्ने गोपिण्डे तत्सम्बन्धो न स्यात् तदुक्तं वाक्ये न याति न च तत्रासीदस्ति पश्चान्न चांशवत् जहाति पूर्वं
नाधारमहो व्यसनसन्ततिः तथा च घटादावपि सर्वत्र गोत्वप्रकारकप्रत्ययप्रसंगः तदुक्तं व्यक्तौ वैकत्र साऽन्यत्र भेदात्सर्वत्रगा यदि जातिर्दृ न्या०
श्येत सर्वत्रेति मैवं समवायाख्यसंबन्धविशेषस्य गोव्यक्तिभिरेव समस्वीकारात् तत्र च स्वभावस्यैव नियामकत्वात् अत एव जीवानां व्याप ४४

© Dharmartha Trust J&K. Digitized by eGangotri

45

कात्स्न्येप्यवच्छेदकताख्यः संबंधः शरीरविशेषस्य स्वीक्रियते अन्यथा सर्वशरीरावच्छेदेन सर्वेषां सुखादिसाक्षात्कारापत्तेः यत्तु वौद्धाः अपोह एव
अतद्व्यावृत्तिरूपो जातिः गोभिन्नभेदस्य गोमात्रे सत्त्वादतिरिक्तगोत्वे मानाभावादिति तदसत् गोभिन्नमित्यत्र यत्किंचिद्गोप्रतियोगित्वस्यपाको भेदो
निवेश्यते गोत्वावच्छिन्नप्रतियोगिताको वा नाद्यः गोरपि यत्किंचिद्गोपेक्ष्याभिन्नत्वात् न द्वितीयः तद्भेदस्य घटेपि सत्त्वात्तत्रापि गौरिति प्रसंगापत्तेः गोत्वं
अतिरिक्तं गोत्वं सिद्धं तदाहुः सिद्धश्चागोरपोहे तद्गोनिषेधात्मकश्च सः तत्र गौरेव वक्तव्यो नञा यः प्रतिषिध्यते इति · क्रियाशब्दानामपि
जातिवाचित्वमेव गुडतंडुलादिपाकव्यक्तिष्वनंतरवैलक्षण्यसत्त्वेपि पाकत्वसाधारणधर्मस्य डित्थशब्दहेतुसंज्ञिष्वपि संबंधिसंबंधादभिन्नप्रत्यया
भिधाननिमित्तं तथा व्यक्त्याश्रयवाच्यत्वसंबंधेन व्यक्तिनिष्ठं डित्थशब्दत्वं तदर्थेषु प्रवृत्तिनिमित्तं वद्धिमानित्यादौ स्वसमवायिसंयोगसंबंधेन वृद्धि
त्वमिवेत्याशयः तौ अत्तौ इत्यादौ च परोक्षत्वमप्रत्यक्षत्वादिकं अभावाश्रितगोरहस्यत्रापि निरूप्याख्यात्वं नाम सामान्यमाश्रयणीयं गोत्वाश्रितत्वे
सामान्ये इति व्याहतेश्च न च तमप्रत्ययहेतुत्वं सामान्यानामपि सामान्यमस्ति अथवा नित्यः सामान्यानि सामान्यानीति तार्किकदर्शने वै
याकरणे नियमतत्त्वात्सच्छेदं कार्यत्रीयमाना हि तेषां पदार्था इति सामान्येष्वपि सामान्यमस्तीति कैयटः न चैवं सामान्येष्वपि सामान्यस्वी

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ सु॰ ४६ रेऽनवस्थापत्तिरिति वाच्यं एकव्यक्तित्वरूपबाधकसत्त्वेन तत्र जातेरस्वीकारात् यत्तु घटत्वादिजातिमादाय तस्याप्यनेकव्यक्तिकत्वमस्त्येवे
ति तत्र तत्साधारणजात्यन्तरस्वीकारे प्रयोजनाभावात् सामान्यत्वजात्यैव तत्रानुवृत्तप्रतीत्युपपत्तेरिति दिक् ननु जातिपदार्थवादित्वादीनां
कथमन्वयः तस्या एकत्वात् मैवं एकाश्रयसंबन्धविवक्षायामाकृतेरेकवचनं यथा धेनुगा यजेतेति अनेकाश्रयसंबन्धविवक्षायां तु द्वि
वचनबहुवचने नहि जातिपदार्थवादिना व्यक्तेरनभिधेयत्वं स्वीक्रियते किं तु गुणभावमात्रं तच यथा पचतिप्रवृत्तः प्रवर्तीत्यादौ क्रियाप्रा
धान्येपि साधनसंख्याकृतो वचनभेदः एवमाकृतिप्राधान्येपि द्रव्यसंख्याकृत इत्यदोषात् नन्वेवमपि लिंगभेदो न स्यात् आलरणी आलरणद
ति उक्तं हि विशेषणानां चाजातेरित्यत्र आविष्टलिंगा जातिरिति सर्वदाप्येकमेवाश्रयगतं लिंगमुपादाने इत्यर्थ मैवं स्तनकेशादिसंबन्धरूपा
स्य स्त्रीत्वादेर्लौकिकस्यात्र लिंगत्वेनानुपादानात् तथा सति लिंगान्तरसंबन्धायोगात् किं तु स्वसिद्धान्तव्यवस्था शाब्दिकैराश्रीयते तथा हि स
त्वरजस्तमः परिणामरूपाणां शब्दादीनां वृद्धिह्रासमध्यस्थावस्थाः शाब्दिकगोचरा लिंगत्वेन परिगृह्यन्ते गुणानां वृद्धिः पुंस्त्वं अपचयः स्त्रीत्वं
स्थितिमात्रं नपुंसकत्वं अतएवोत्कर्षापकर्षस्यापि तदविवक्षायां स्थितिमात्राभिप्रायेण सामान्ये नपुंसकमिति शास्त्रे संगच्छते एतच्च त्रिपादि सु॰ ४६

ति सूत्रे प्रपंचयिष्यामः॥ ॥ वृद्धो यूना तल्लक्षणश्चेदेव विशेषः ॥ अपत्यमन्तर्हितं वृद्धमिति पूर्वाचार्यपरिभाषया वृद्धपदं गोत्रपरं पारिभाषिक
युवपदं साहचर्यात् युवप्रत्ययान्तेन सह गोत्रप्रत्ययान्तः शिष्यते उक्तप्रत्ययमात्रकृतं चेत्तयोः कृत्स्नं वैरूप्यं गार्ग्यश्च गार्ग्यायणश्च गा
र्ग्यौ वृद्ध इति किं गर्गश्च गार्ग्यायणश्च गर्गगार्ग्यायणौ यूनेति किं गर्गश्च गार्ग्यश्च गर्गगार्ग्यौ तल्लक्षण इति किं भागवित्तिभागवित्तिकौ भागवित्तेश
वृद्धो ऽपत्ये ऽत्र तद्धिते तस्माद्यून्यपत्ये वृद्धाट्ठक्सौवीरेषु बहुलमिति ठक् इह न केवलं प्रत्ययमात्रकृतं वैरूप्यं किं तु कुत्सा सौवीरगोत्रत्वे कृत
मपि गोत्रस्त्रियाः कुत्सने ण चेत्यतः कुत्सने इत्यस्यानुवृत्तेः कृत्स्न इति किं गार्ग्यश्च वात्स्यायनश्च गार्ग्यवात्स्यायनौ॥ ॥ स्त्री पुंवच्च ॥ यूना सहोक्तौ वृद्धा स्त्री
शिष्यते तदर्थश्च पुंवत् स्त्रीत्वप्रयुक्तवैरूप्याधिक्यादप्राप्तावारम्भः गार्गी च गार्ग्यायणश्च गार्ग्यौ आस्त्रियामित्यनुवृत्तौ यञञोश्चेति लुक् दाक्षी च दाक्षा
यणश्च दाक्षी इह स्त्रीशब्दस्य स्वरितत्वेन तदधिकारीयप्रत्ययोपादाने पुंवत्त्वे स्त्रीप्रत्ययपदलभ्यमानातिदेशो वा स्त्रीत्वमात्राभावे शब्दग्रहणं वा अर्थग्रहणं वा ना
धः उक्तस्थले गार्ग्यादित्यत्र यञश्च लुगापत्तेः आस्त्रियामिति तत्स्त्रीप्रतिषेधात् प्रसज्यप्रतिषेधे वायं दोषः पर्युदासे तु स्त्रीसदृशार्थसत्त्वात् शिष्यमा
णस्य लुप्यमानार्थाभिधायित्वात् तद्धितीयः स्त्रीत्वस्याविवक्षा गार्ग्यायणे ऽपत्ये तस्माच्छस्तोनः पुंसीति नत्वानुपपत्तेः तस्मान्ङीपः साधः कुमर्थाति

© Dharmartha Trust J&K. Digitized by eGangotri

सि०पु० देशे तत्सम्प्रयुक्तकार्यप्रवृत्तेः एवमन्यत्रापि बोध्यं॥ ॥पुमान्स्त्रिया॥ सरूपाणां मध्ये स्त्रिया सहोक्तो पुमानवशिष्यते सच पुंवद्देवतद्धितलक्षणश्चेद्विशेषः
४७ हंसश्च हंसी च हंसौ शिष्यमाणस्य लुप्यमानार्थाभिधायित्वेन स्त्रीत्वस्यापि सत्वेन टाप्प्राप्तः पुंवद्भावेन तु न भवति· यदा तद्धितलक्षण एव विशेषो
47 ऽयमेकशेषः यथा गोश्चायं गोश्चेयमिमौ गावौ वरतर इति कैयटः तदितरकृतविशेषविरहरूपे विशिष्टाभावे ऽप्यतोन्त्यपं स चात्रापि विशेषाभावाद
त्स्येवेति दीक्षिताः पुमानिति योगविभागाद्विशेषाभावेप्येकशेषः शिष्टप्रयोगस्यानियामकत्वाच्च नातिप्रसंग इत्यास्सकारः हंसश्च वरटा चेत्यादौ
नैकशेषः सरूपानुवृत्त्या प्रकृतिसाम्यलाभात्॥ ॥भ्रातृपुत्रौ स्वसृदुहितृभ्यां॥ भ्राता च स्वसा च भ्रातरौ· पुत्रश्च दुहिता च पुत्रौ पूर्वसूत्रे सरूपपदा
नुवृत्तौ चेत्तदेव सूत्रे मानं अन्यथात्रापि तेनैव स्यात् त्यदादीनि सर्वैरित्यत्र तु न तदनुवृत्तिर्बोधितत्वात्· अत्र भाष्यं गार्ग्यश्च गार्ग्यायणश्चेत्यत्र वृद्ध
यूनोर्द्वयोरेकं गार्ग्यायणत्वरूपं सामान्यं न स्यैव विवक्षितत्वात्सिद्धं गार्ग्याविति वृद्धयूनोरत्रोपादानं किं वा वृद्धयोरेवेति विशेषावधारणार्थं एकशेषारंभप
क्षेपि प्रकरणादेरपेक्षणीयत्वात्· समानोपादानेपि तेनैव विशेषनिर्णयसंभवात्· न चेदं दृढीकरणार्थमेकशेषारंभः अभिधानादेव तन्निवृत्तेः स्त्रीपुं एम०
सयोरपि मृगक्षीरादिवज्जातिमात्रविवक्षया ब्राह्मणावित्यादि सिद्धं स्यादेतत्· ब्राह्मणवत्सा च ब्राह्मणीवत्सश्चेत्यत्र पुमान्स्त्रियेत्येकशेषप्रसंगः यत्रै ४७

© Dharmartha Trust J&K. Digitized by eGangotri

काप्रत्ययप्रकृतिरन्यत्तु वैरूप्यं तादृशविषयस्य सत्वात् । नचैकविभक्तावित्यनुवृत्त्या एकशेषनिमित्ते विभक्तौ परतो यत्र स्त्रीपुंसकृतो विशेषस्तत्रैक
शेषः इह तु पूर्वपदविभक्तावपि स्त्रीपुंसकृतविशेषसत्वान्नेति वाच्यं कारकश्च कारिका च कारकावित्येकशेषानापत्तेः इत्थं यत्र स्त्रीत्वकृतो विशेषः त
स्यैवैकशेषनिमित्तविभक्तिमपेक्ष्य पूर्वत्वाभावात् । नच इत्थं स्य स्त्रीप्रत्ययकृतविशेषरूपत्वेपि स्त्रीत्वरूपार्थकृतविशेषत्वं नास्तीति वाच्यं तथासति
गोमांश्च गोमती च गोमन्तावित्यसिद्धेः स्त्रीप्रत्यये नात्र विशेषान्तरानाधानात् । स्त्रीत्वरूपार्थे न तु प्रथमपदरूपस्यैव विशेषस्याहितत्वात् । तथा च केचिदा
र्याहितस्य कश्चित् स्त्रीप्रत्ययाहितस्य विशेषस्यावश्यपर्याप्तत्वात् । नच पदं च पपी पदं च पदी च पद इत्यादावेकशेषो न स्यात् यणादेशे स्त्रीत्वस्त्री
प्रत्ययान्तस्यापि निमित्तत्वाभावात् । अग्रूपत्वमेवास्त्रि त्ययस्य विहितत्वादिति वाच्यं तन्मात्रव्याप्तितामात्रेण स्त्रीप्रत्ययस्य परंपरया च स्त्रीत्वस
यणादेशनिमित्तत्वात् एवं इत्थेपीति गार्ग्यायणा वत्साचेत्यादावेकशेषो दुर्वार इति मैवं तदस्यानुवृत्त्या प्रधानयोरेव स्त्रीपुंसयोर्ग्रहणात् । सहविव
क्षायां चैकशेषस्य सत्वाहितमिति ॥ ॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ॥ अक्लीवेन सहोक्तौ क्लीवं शिष्यते तच्चैकवद्वा तल्लक्षणश्चेद्विशे
षः शुक्लश्च कम्बलः शुक्ला च बृहती तदिदं शुक्लं ते इमे शुक्ले शुक्लः कम्बलः शुक्ला बृहतिका शुक्लं वस्त्रं च तदिदं शुक्लं तानीमानि शुक्लानि । अत्र मा

© Dharmartha Trust J&K. Digitized by eGangotri

सि० मु०
४८
48

यं स्थितिमात्रविवक्षायां औत्सर्गिकं नपुंसकमेव सिद्धं न च पाक्षिकैकवद्भावार्थं सूत्रं जातिप्राधान्यविवक्षयैव सिद्धेः ॥ ।पिता मात्रा ।स्य
द्वं वेत्यनुवर्त्तते पिता च माता च पितरौ मातापितरौ रौहित्रभावे पितरौ घनमाजाविस्तेन व्याख्याने यद्यपि युगपदधिकरणवचनतायां द्व
न्द्वस्मरणात् तदपवादत्वादेकशेषस्य धनचरहरणो पित्रोः क्रमो न प्रतीयते तथापि विग्रहवाक्ये मातृशब्दस्य पूर्वनिपातादेकशेषाभावपक्षेव मा
तापितराविति मातृशब्दस्य पूर्वश्रवणात् पाठक्रमेणार्थक्रमावगमात् संबंधे विक्रमापेक्षायां प्रतीतक्रमानुरोधेनैव प्रथमं माताधनमा
कृतत्वाच्चैव पितेति जगतः इति विज्ञानेश्वरः एतेन जगतः पितरौ वंदे पार्वतीपरमेश्वरावित्यपि व्याख्यातं योगपत्याद्धिश्रमाणां तरवशान्निर्णय इतिप
र्यवसानात् एतेन भवानपितृत्वपितावशेषेसापुञ्जमासादयन्ते शिवाभ्यामिति विषयान्तरमपि व्याख्यातं स्त्रीलिंगस्य विग्रहवाक्ये पूर्वप्रयोगनिय
मे मानाभावात् उदीच्यकरभक्ष्य इत्यश्ववडवावित्यादौ कस्मान्न भवतीति भाष्यदर्शनात् श्वशुरः श्वश्रूः स्यषं श्वशुरौ श्वश्रूश्वशुरौ सूत्रद्वयम
धिकृत्य भाष्यं वृत्तिविषये भ्रात्रादिशब्दानां स्वस्रादिबोधकत्वेनापदेकशेषारम्भेपि स्त्रीकायां शिष्यमाणत्वं यमानार्थाभिधायीति सिद्धान्तात् न
हृदं एकशेषं विनापि शब्दार्थसंबंधस्य नित्यत्वात् स्वविवक्षायामेव तथात्वं लौकिकप्रयत्नेनाभिधानाद्यभावात् स्वरूपाद्व्योर्न द्वंद्वः मातापितरौ

एमु०
४८

© Dharmartha Trust J&K. Digitized by eGangotri

श्वश्रूश्वशुरौ इत्यत्र च द्वंद्वस्य वाशब्दानुवृत्त्या तत्पाक्षिकीकारणे किमयं सरूपयोरेकशेष उत विरूपयोरित्यवधारणार्थमकरणे नियामकस्याभावात्वा
द्येति शङ्कालेशः स्वस्रोरथाग्रहीदिति भागवते तु स्वसृपदं भ्रातृपदं तदुपदधातीति वत् लिंगसमवायेन स्वसृ तत्त्वतो लक्षितत्वात् किं न चोभयोः साम्याद
त्पत्वानुपपत्तिः तत्र भ्रातृपदं गर्भमन्त्रस्य तेऽरि हितमं त्वापेक्षया ऽल्पत्वादिति वाच्यं लक्षणापेक्षया शक्यानां बहुत्वाभावमात्रस्य तत्र विवक्षितत्वादि
ति श्रीधरः॥ ॥त्यदादीनि सर्वैर्नित्यं स्वभिन्नैः सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते स च देवदत्तश्च तौ त्यदादितः शेषे पुंनपुंसकतो लिंगवचना
नीति वक्तव्यं सा च देवदत्तश्च तौ सा च कुण्डं च तानि शिष्यमाणत्वात् त्यदादिलिंगे प्राप्ते ऽयमारम्भः पुंनपुंसकयोस्त्वेकशेषशास्त्रपरत्वप्रतिषेधा
न्नपुंसकशेषः तच्च देवदत्तश्च ते अद्वंद्वतत्पुरुषविशेषणानामिति वक्तव्यं स च कुक्कुटः सा च मयूरी च कुक्कुटमयूर्याविति तत्र सा च गार्ग्यश्च पिप्प
ल्यौ न त्यपसिद्धं चेदं परवल्लिंगं द्वंद्वतत्पुरुषयोरिति समासार्थस्य लिंगातिदेशान्न विशेषणस्य सर्वनाम्नस्तल्लिंगत्वसिद्धेरिति कैयटः त्यदादीनां
सर्वनामत्वाद्बुद्धिमात्रपरामर्शकत्वोपदर्शितेऽरेण सहोक्तौ तेषामेव शेषो न्यायसिद्ध इति नेदमारम्भं न च त्यदादीनां पत्यपरं तच्छिष्यत इत्येतदर्थमस्
त्रे तद्विनाशाद्वपरविप्रतिषेधालाभादिति वाच्यं स च पश्च तावानयपावानयेति पूर्वशेषस्याप्यपीष्टत्वात सूत्रारम्भपदे चेत्तदसिद्धः नापि त्यदेकत्वो

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ सु॰
४९
५९

विति प्रयोगवारणार्थं सामान्यविशेषवाचिनोर्द्वन्द्वस्येति वचनस्यावश्यकत्वात् नचैवं मृद्वाभीरं गोबलीवर्दं त्यागोलपं इति न स्यादिति वाच्यं आभी
राणां जात्यन्तरत्वात् ब्राह्मणादुग्रकन्यायामाभीरो नाम जायते माहिष्योग्रौ प्रजायेते विट्शूद्राङ्गनयोर्नृपादिति स्मृतेः गोशब्दस्यैव स्त्रीगवी
मात्रवाचकत्वात् वृषभे शक्त्यन्तरस्वीकारात् न च सामान्यपदेन विशेषार्थस्यापि प्रतीतिसिद्धेर्न द्वन्द्वप्रसक्तिरिति वाच्यं ते ब्राह्मणमानय गार्ग्यमिति
प्रयोगदर्शनात् विशेषणविशेष्यभाववत् विशेषसन्निधौ सामान्यस्य तदितरविशेषपरत्वस्यापि ब्राह्मणा आगता वसिष्ठोऽप्यागत इत्यादौ दर्श
नात् तस्मात्सामान्यविशेषयोर्द्वन्द्वनिषेधवचनस्यावश्यकत्वात्तेनैव सिद्धे नैतत्सूत्रमारम्भणीयमिति भाष्यं ॥ ॥ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री
पुमान् स्त्रियेत्यस्यापवादः एषु सहविवक्षायां स्त्री शिष्यते गाव इमाः अजा इमाः ग्राम्येति किं न्यङ्कव इमे सूकरा इमे पशुष्विति किं ब्राह्मणा इमे सं
घेति किं एतौ गावौ संघे गुणत्वानुपपत्तेः घटः कश्चिदयं तद्व्यवहारेऽपि वसंघत्वमवैवि संघपदस्येह सामर्थ्यादनेकघटितस्यैव संघस्य विवक्षितत्वा
त् अतरुणेष्विति किं तर्णका इमे वर्करा इमे संघे तरुणत्वतदभावयोरन्वयानुपपत्तेः संघघटकपशुव्यक्तिनिष्ठयोस्तयोरुपादानं सामर्थ्यात् अने
कशफेष्विति वाच्यं नेह अश्वा इमे उष्ट्रा इमे विकल्पानुवृत्त्या वा सिद्धेस्तत्त्वाच्चेदमिति न्यासकृत् अत्रापि भाष्यं नैतदारम्भं संघेषु स्त्रीगवीनामेव वा

एम॰
४९

© Dharmartha Trust J&K. Digitized by eGangotri

उत्वात् मद्व्यश्रामादिवद्रूपस्येनन्नमपदेशादेवस्त्रीयोषसिद्धेः अश्राम्येषुतुपुंसामेवप्राधान्यात् उद्धारणांत्वारस्पकत्वेनसूत्रारंभेपिस्त्रीशेषत्वाभा
वात् अलरणाइत्यादावपिपुंसामेवप्राधान्यात् एतावितायेवनिर्ज्ञातेलिंगविशेषेपुंसएवशेषात् वेत्साइमेइत्यादावपिपुंसामेवप्राधान्यादिति॥ ॥
इतिश्रीसिद्धान्तसुधानिधौप्रथमस्याद्वितीयेतृतीयमाह्निकम्॥ ॥पादश्चायंसमाप्तः॥ श्रीगणेशायनमः॥ भूवादयोधातवः॥ क्रियावचनाभ्वाद
योधातुसंज्ञाःस्युः भवति धातुत्वाद्धेडस्यः यः पश्यसीत्यादौधातुसंज्ञायांयाइत्यादेरातोलोपस्यवारणायक्रियावचनाइति हिनुकृपश्यकृ इत्या
दौवर्जयितुंत्वेसाद्यर्थकेनिपातेश्चिश्चेइत्यादौभावतिङ्तेचातिव्याप्तिवारणायभ्वादयइतिः गणपठिताइत्यर्थकं नचलोहलोकत्वादेवपाशह
स्यगणेनपाठानमितिवाच्यं स्थलांतरेप्रतिपदोक्तत्वस्यतत्रापेक्षितत्वात् नचांतरंगत्वोपेऽर्थनिमित्तकतयावहिरंगस्यदायोसिद्धत्वं लिंग
साकारकापेक्षयाप्रथमप्रतीतिकत्वेनअजादिप्रत्ययनिमित्तकस्यलोपस्यैवबहिरंगत्वोत् नाजानंतर्यइतिनिषेधादित्यपिकेचित् नचार्थ
निर्देशोनियामकः तस्यागमपृक्तांतरकृतत्वेनापाणिनीयत्वात् क्रियावाचित्वमाख्यातुमेकैकोर्थः प्रदर्शितः प्रयोगतोनुसर्तव्याअनेकार्था
हिधातवइत्यर्थंतस्यावर्त्तनात्पर्याभावाच्च अतएवकुर्दखुर्दगुर्दगुदक्रीडायामेवेत्येवकारःश्चिपश्चालिंगनइत्यादिकंचसंगच्छते नचै

© Dharmartha Trust J&K. Digitized by eGangotri

वंद्रुवमउद्गिरणा इति निपातनादित्वमितस्यानुपपत्तिः एतदपरितोषादेवष्टिकोद्याहित्वस्यानैमित्तिकत्वात् भूवादय इति निपातनाद्वकारागमः न
वासाधुत्वं वैयाकरणनिकायेप्रसिद्धत्वात् न च क्रियावचनत्वस्य सत्त्वाद् लाभः भवनं भूः क्रियासामान्यं तद्वदंतीति भूवादय इत्यर्थात् वसि
वपियजिराजिव्रजिसदिहनिमासिवादिवाशिभ्य इञ् इत्यत्र वादयतेर्विधानेपि वाउलकादद्देरपितसंभवादिति केचित् वादयतेरेवात्र इञ् निवृत्त
प्रेषणे तयोरर्थभेदाभावात् वदंतीति भाष्यस्य चार्थकथनपरत्वादित्यपरे न चैवं गणपठितत्वस्य दौर्लभ्यं सनाद्यन्ता धातव इत्यस्यारंभेणपठि
तानामेव संज्ञानुमानात् सौत्राणां तु स्तम्भ्वादीनामप्यदित्करणेन धात्वधिकारीयकार्यविधाने न च धातुत्वासिद्धिः चुलुम्पादीनां वस्वादेराकृतिगण
त्वात् वाक्यशेषस्य पचादिसमाप्त्यर्थत्वात् एतेन दिवाद्यन्ते वृत्करणं पुषादिसमाप्त्यर्थं तेन मृगयतीत्यादिकमपि व्याख्यातं वस्तुतो वा बहुलमेतन्नि
दर्शनमिति चुराद्यन्ते गणसूत्रेणार्थवत्त्वसिद्धिः भ्वादिभ्योपि स्वार्थे णिच् पक्षे दशगणीपाठो दिङ्मात्रं शिष्टप्रयोगादन्येपि धातवो ज्ञेया इति द्वेधा
तस्य ग्रंथस्य कृद्भिर्व्याख्यानात् यद्वा भूश्च वाश्चेति द्वंद्वः आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषः भ्वौ आदी येषामिति बहुव्रीहिः सादृश्यं च क्रि
यावाचित्वेनेति पयोरुक्तविशेषणद्वयलाभः न च वाते र्धातुत्वानापत्तिः भेदघटितसादृश्यस्यात्र सत्त्वात् यद्वा वादय इत्यत्र बहुव्रीहिः तत्पुरुष रा०
५०

© Dharmartha Trust J&K. Digitized by eGangotri

योरेकशेषे स्वरभिन्नानां यत्परं तच्छिष्यत इति बहुव्रीहेः शेषः भुवो वाद्य इति षष्ठीसमासः वाच्यवाचकभावश्च षष्ठ्यर्थः पठ्यंते त्राव्वसादिना त्र
मपलाभः द्विर्वचनेचीत्यादिवत् अत्र भू अभ त पो वा सदृशाइत्येव सारं एतेन भूवादीनां वकारो यं मंगलार्थः प्रयुज्यते भुवो वार्थं वदंतीति व्यर्थो
वा वादयः स्मृता इति वार्त्तिकं व्याख्यातं वक्ष्यते त्वमि पृक्तानां परिभाषा विशेषसंबंधेन धातुपदत्वमेव धातुत्वं तत्परिवायकचोक्तसूत्रे न तु भ्वा
घन्तर्गतत्वे गौरवात् अनुकरणोच्छन्नेन रूपाणामतिप्रसंगाच्च तथा हि त्वस्य भू त्वादेर्यतमत्वघटकस्य प्रकारांतरेण दुर्वचत्वात् अत
एव सौत्राणां चुलुंपादीनां च संग्रहः अत एव च धातुत्वमिति तात्रिकाणामुद्घोषः संगच्छते अथ केयं क्रिया नाम यत्वाहुः फलाव्य
वच्छिन्नपूर्वकालवृत्ती व्यापारविशेषस्तथा अपि अपराणादीनां तु क्रियात्वमौपचारिकं तदुक्तं अनेनंतरं फलं यस्याः कल्प्यते तां क्रियां वि
दुः। प्रधानभूतां तादर्थ्याद् अन्यासां तु तदाख्यया नैव काष्ठादिव्यापारस्य तथात्वाद्व्यभिचारः जनकांतरानुकूलत्वस्य विवक्षितत्वात् नापि
पाकारंभोपक्रियायामाविलंबितोत्पत्तिप्रसंगात्प्रपत्तिः गौणमुख्यसाधारणेन क्रियास्वरूपस्य तीनत्वेऽपाद्वीदिति प्रागभावे पचतीति पकिंचित्से त्वे
चतीति प्रयोग इति व्यवस्थाभ्युपगमात् इदंच पाद्युः धोभाष्ये स्पष्टं तत्र मुख्यत्वसंभवे गौणत्वस्यानुचितत्वात् अथ पचिः तं पातिः पचतीत्य नुग

© Dharmartha Trust J&K. Digitized by eGangotri

सि०भू०
५१
51

व्यवहारात्· सैव क्रिया नचैवमसाध्यत्वापत्तिः तदाश्रयव्यक्तीनामेव तथात्वात् तदुक्तं जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीं असा
ध्या व्यक्तिरूपेण सा साध्येवावभासते तत्र रूढ्यादिव्यापारस्यापि फलानुकूलत्वेन तदाश्रयस्य दंडस्य कर्तृत्वे तस्मात् तदभिधानापत्त्या दंडेन देवद
त्तः पचतीत्यत्र दंडेऽपि प्रथमापत्तेः नच करणार्थे तृतीया कर्तृत्वे करणत्वस्यानुपपत्तेः आकडारादेकासंज्ञेति नियमात् नच तदा दंड्यादिव्यापार
स्य धात्वर्थत्वे नाविवक्षितत्वान्न दोष इति वाच्यं तथापि क्रियायाः साध्यत्वप्रकारकप्रत्ययविषयकत्वे मानाभावात्· अथ साध्यत्वेनाभिधीयमानो
व्यापारविशेषः क्रिया तदुक्तं यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते नच साध्यत्वेनाभिधाने मा
नाभावः पचति पाकं करोति कृतिरित्यादौ धात्वर्थप्रतीत्यविशेषेऽपि क्रियान्तराकांक्षायाः दर्शनस्य मानत्वात् तथा च क्रियान्तराकांक्षानुत्था
पकतावच्छेदकत्वं साध्यत्वं तदेवासत्त्वभूतत्वं क्रियायाः प्रत्ययार्थतायांऽपि पचति पाकं भावनेत्यादौ तथा दर्शनात् तथात्वावश्यकत्वादिति त
न्न साध्यत्वप्रकारकशाब्दबोधस्य सर्वानुभवविरुद्धत्वात्· भोक्तुमित्यादावसत्त्वभूतो क्रियाभासत इति सिद्धान्तविरोधाच्च क्रियांतराकांक्षापकत्वस्
त्वात्· इति तत्तीयेव द्रष्टव्यत इति चेत् अत्रोच्यते फलानुकूलो व्यापारसमूह एव क्रिया तदुक्तं भाष्ये क्रियानामेयमत्यन्तापरिदृष्टा पूर्वापरीभूता

एम०
५१

© Dharmartha Trust J&K. Digitized by eGangotri

वयवा न शक्याः पिण्डीभूता निदर्शयितुमिति व्यापारसमूहस्यादरकानामवयवानामेकाकारेणानवच्छिन्नतया प्रत्यक्षासंभवादित्यर्थः तथा वा
वाक्यपदीये गुणभूतैरवयवैः समूहः क्रमजन्मनां बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते युगपदनवस्थानेऽहेतुः क्रमजन्मनामिति
बुद्ध्या जातावच्छिन्नैकसमूहालम्बनज्ञानेनोपकल्पितः अभेदोऽयस्य तथा वानेकवर्णसमुदायेऽप्येकज्ञानावच्छिन्नतयैक्यं पदमिति व्यवहार
स्तथोक्तरूपे लक्रियाया अपीत्यर्थः पिण्डीभूतेति यथा परमाणवः पिण्डीभूता उपलभ्यन्ते न केवलाः एवं पिण्डीभावाभावात् क्रिया न प्रत्यक्षेति कौ
टः काव्यप्रकाशकारेणाप्युक्तं साध्यः पूर्वापरीभूतावयवः क्रियारूपः इति तत्र व्याख्यातारोऽपि साध्यः साध्यत्वेन विवक्षितः पूर्वापरीभूत
त्वेन प्रतीयमाना अवयवाः प्रचयान्तर्गताः अवयविनोऽधिश्रयणादयो यस्य पाकादिधात्वर्थस्य सः अक्रमस्य क्रमप्राप्तिरित्यर्थः प्रचयस्यान्ते
न्त्यत्वेकातिरिक्तरूपाभावाद्व्यापाराणामंशत्वेकं पातकत्वेन क्रमेण पाक इति क्रम एवेति । अत एवोक्तमाश्रितक्रमरूपत्वादिति यद्यधिश्रय
णादिरपि तत्तदाश्रयविशिष्टः क्रियारूपः क्रियाया विशेषणस्य चैकत्वादक्रमत्वेऽप्याश्रयीभूतविशेषणक्रमात्क्रमोपचारः अन्ये तु स्थालीधनत
दुलादिविशिष्टक्रियायवादिधात्वर्थः तद्द्रव्यवाचिनस्तन्निष्ठशक्त्यवच्छेदैकत्वे सति साश्रयाः स्थाल्यादयः तेषां वास्तवयोर्विपर्याभावाद्विप्रत्यय

© Dharmartha Trust J&K. Digitized by eGangotri

सि०मु० इत्याहुः नच यत्र तण्डुलपरिधारणादपोवतारणापर्यन्तो व्यापारः प्रत्यक्षभेदेन नानापाकक्रियासु प्रयोगप्रसङ्गश्चेति तदापाकक्रियाकृत्स्नं
५२ स्यादिति वाच्यं तद्व्यक्तीनां परस्परसहकारित्वाभावात् ननु पाकत्वं प्रत्येकव्यापारपर्याप्तं न तु संयोगादिवद्व्यासज्यवृत्तिः भिन्नकालीनेषु र
कस्य व्यासज्यानुपपत्तेः उक्तं ग्रन्थान्तरेभ्योपि तथाप्रतीतेश्च शङ्करकण्टकोद्धारेप्युक्तं चुल्ल्युज्ज्वालनमारभ्यावतारणापर्यन्तव्यापारकलापे घ
52 टत्वादिवत्प्रत्येकपर्याप्तमेव पाकत्वं भावनात्वं वा आख्यातार्थो वा फलावच्छिन्नव्यापारसमुदायस्य तदर्थत्वात् उक्तं च भाष्ये नानाविधैका
र्था क्रियापचतीति· स्थाल्यधिश्रयणासेचनोदकावसेचनं तण्डुलावपनमेधोपकर्षणमग्निज्वालनं दर्वीघट्टनमवतारणमिति· तथा च पाकप्रत्यक्षं स्यादेवे
ति चेन्न पावत्वस्य व्यक्ते न तथात्वेपि तत्समूहस्यैव क्रियाव्यवहारविषयत्वात् तस्य च प्रत्यक्षायोगात् अत एव पश्य मृगो धावतीत्यादावेकदेशस्यैव वर्त
मानस्य दर्शनकर्मत्वमिति तत्त्वीपेवक्ष्यते तदुक्तं हरिणा· क्रमात्सदसतां तेषामात्मानो न समूहिनां सद्वस्तुविषयैर्यान्ति संबन्धं चक्षुरादिभिः नंचाती
त्यन्तकः क्रमिकव्यापारसमुदायस्य क्रियात्वात्तस्य वर्तमानत्वासंभवात् न चक्षुरादिग्राह्यत्वं वर्तमानस्य तदेकदेशभूतस्य व्यापारस्य चाक्षुषत्वे तत्पच मु०
न्नमेवेत्यर्थः न तु सिद्धं क्रियाधात्वर्थ इति अथोक्तरूपक्रियाधात्वर्थत्वे किं मानं न तावद्भावप्रधानमाख्यातमिति निरुक्तं आख्यातशब्दस्य धातावेशा ५२

© Dharmartha Trust J&K. Digitized by eGangotri

कत्वात्॰ ननु सर्वमाख्यातजं नामेति निरुक्तकृताभिधानात्तस्य धातुवाचकत्वं प्रत्ययजन्यत्वस्य नामत्वसंभवात् नाम च धातुजमाह नि
रुक्ते व्याकरणे शकटस्य च तोकमिति भाष्योक्तेश्च शाकटस्य च सुतोकमपत्यमिति कैयटः शाकटायन इति यावत्॰ तथा च निरुक्तं तत्र
नामान्याख्यातजानीति॰ शाकटायनो नैरुक्तसमयश्चेति तिचेत् मैवं कृदन्ते धातावाख्यातपदस्य प्रयोगाभावात्॰ तत्र लक्षणया तद्रूपप
त्तेः अत एव येषां तूत्पन्नावर्थे स्वप्रयोगो न विद्यते तान्याख्यातानीति जैमिनिसूत्रेपि लक्षणयैवाख्यातपदं धातुपरं अत एवाविकरणकाले स्वे
र्थे प्रयोगो न विद्यते स्वार्थसिद्धो न विद्यत इति यावत्॰ अयं तु विशेषः जैमिनिसूत्रे तेन तिङंतस्यैव धातोर्ग्रहणं निरुक्ते तु आख्यातपदस्य
पल्लक्षणतया धातुस्वरूपमात्रस्येति नापि भावपदस्य भावनापरत्वं धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयत इति वैयाकरणोक्त्या परिभाषि
तत्वेपि निरुक्तेस्मृतौ आख्यातार्थभावनाया एव ग्रहणात्॰ तस्य व्याकरणमात्रपरत्वात् तत्रापि नपुंसके भावे क्त इत्यादावेव तथा॰ न
तु तस्य भावस्त्वतलावित्यादाविति स्पष्टं किंच भावनाया धात्वर्थत्वे मुख्यविशेष्यत्वं न स्यात्॰ प्रत्ययार्थप्राधान्यभंगापत्तेः क्वचित्तत्परि
त्यागेपि तत्संगे पक्षपातस्य प्रकोपोत्तः॰ न च भावनाया अस्ति ङ॰ र्थत्वे कृदंतेषु तत्प्राप्तीति निःस्यादिति वाच्यं धात्वर्थकारके तत्सिद्धेः तदुक्तं घा

© Dharmartha Trust J&K. Digitized by eGangotri

ति॰सु॰ त्वर्थकारकैरेव गुणभूतोवगम्यते भावनात्मकं त्वेषु तस्मान्नैवाभिधीयते अत एव भावनाप्रधानत्वादाख्याते सुतत्संबंधादेव
५३ गुणभूतकारकप्रतीतेः सिद्धे न कर्तृकर्मणोरभिधानं नच स्वार्थफलव्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वनिर्वचनानुपपत्तिः तत्र हि वस्तु
तः फलव्यधिकरणो यो व्यापारस्तद्वाचित्वं सकर्मकत्वं उत फलव्यधिकरणत्वेन व्यापारवाचकत्वं नाद्यः पच्यादेरपि फलाविवक्षायामकर्मकत्वापत्ती
53 कारात् तत्र च वस्तुतः फलव्यधिकरणत्वस्याभावात् नान्त्यः अनुभवविरोधात् नच सर्वदाकर्मकस्यैव वारणीयत्वात् पूर्वोक्तातिव्याप्तिरिति वाच्यं ता
दृशाकर्मकादिलक्षणस्यानुपपन्नत्वात् लः कर्मणि भावे चाकर्मकेभ्य इत्यकर्मकग्रहणेनाविवक्षितकर्मकाणामपि ग्रहणस्येष्टत्वात् नेह
पच्यते इत्यादौ भावे लकार इति हरदत्तादिभिरुक्तत्वात् पीतागावो भुक्ता ब्राह्मणाः क्तान्तपूर्वोक्तं गतं तिरश्चीनमित्यादौ ग्रंथकारैर्भावे क्तप्रत्ययव्या
ख्यानाच्च ननु गतिबुद्ध्यादिसूत्रे गत्यर्थाकर्मकेति सूत्रे च अविद्यमानकर्मकाणामेव ग्रहणं देवदत्तेन पाच्यप्रतीतित्तीपानुरोधात् द्वन्द्वान्य
थवानित्यर्थे द्वन्द्वः पचादेराप्यत्वेष्यतीति चेत् नहि तदननुगमनादेव स्पष्टं तस्मादविवक्षाविरहविशिष्टकर्मसाकांक्षधातुत्वमेव सकर्मकत्वं
तदभावश्चाकर्मकत्वं पच्यादेरनाश्रयेणाकर्मसाकांक्षत्वेप्यविवक्षादशायामकर्मकत्वादविवक्षाविरहेति एतेन फलोपलक्ष्यार्थकत्वे पतिवा राम॰ ५३

© Dharmartha Trust J&K. Digitized by eGangotri

दकर्मकत्वापत्तिरिति निरस्तं तथाख्याकांक्षासमभिव्याहारात्मिकायाश्च धर्मः तेनार्थैक्येपि घटः कर्मत्वमित्यादावनाकांक्षत्वं घटमित्यादौ च
साकांक्षत्वं तदव्देवापत्तेः कर्मणा कांक्षाहाजेश्च तदाकांक्षेत्युपपत्तेः आस्वादि धातूनां च स्वरूपेण कर्मकत्वेपि मासादिकालयोगे तदाकांक्ष
त्वात्सकर्मकत्वं अत एवैधस्यैव यथा धातोश्चैत्रनिष्ठव्यापारमादाय सकर्मकत्वं पृष्ठनिष्ठव्यापारमादायत्वकर्मकत्वमित्यप्युपगमः अथ
भावयति घटमिति वद्भवति घटमित्यपि स्यात् दृष्टांते णिचाद्यर्थान्तिकेचार्थात्तेन व्यापारबोधाविशेषात् न च प्रयोजकव्यापारो णिजर्थः क
र्तृव्यापारस्तारव्यातर्थ इति विशेष इति वाच्यं त्वदुक्तत्याकारकस्य च क्रमप्रयोक्तुरेव कर्तृत्वं न घटस्य तथात्वात् न च यस्यैवान्यापेक्षया रव्यातोपात्तव्यापा
रसमवायः स कर्ता निवाधाध्यायेव्यवस्थितत्वाद्दोष इति वाच्यं करोति क्रियमाणोनेन कश्चित्कर्मणा विनाभवत्यर्थस्य कर्तृत्वे च करोते कर्मजापत्ते॥
करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः भविता न समपेक्षोथ प्रयोज्यत्वं प्रपद्यते तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः प्रयोजकक्रियामाहुर्भा
वनां भावनाविद इति भावार्थाधिकरणे भट्टपादैर्भावनाया णिरूपितत्वात्तदाश्रयस्य कर्तृत्वानुपपत्तेः न च धातूपात्तव्यापाराश्रयत्वमेव कर्तृत्व
मिति वाच्यं व्यापारस्य धात्वर्थत्वे सिद्धे भावनाया ख्यातार्थत्वानुपपत्तेरिति चेन्न अनुकूलव्यापारे शक्तिपक्षे हि अनुकूलत्वे जनकत्वं प्रयो

© Dharmartha Trust J&K. Digitized by eGangotri

सि.सु. जनसाधारणं वा नाद्यः फलजनकशरीरमात्रक्रियाविशेषो पक्षीणस्यात्मनि तत्त्वप्रयत्नादेरतथात्विक्षणासंग्रहापत्तेः नांत्यः क्षणादिसाधार
५४ णात् न च यत्नत्वाद्यः संतापनत्वादीनां तेन रूपेणाशक्यतावच्छेदकत्वांगीकारान्नातिप्रसंगः तथापि पचति पाके यतते इत्यादिविवरणाद्य
त्वादीनां धात्वर्थवरहि भावस्य दुर्वारत्वात् न च यजादियोगे धातोः फलमात्रमर्थः सामान्यसामग्रीमर्यादया तत्बोधापत्तेः घञादिसम
54 भिव्याहारस्य तत्र तिवं त्वे गौरवात् तिबादिसमभिव्याहृतधातुत्वस्य शक्ततावच्छेदकत्वे कार्यकारणभावद्वयमवच्छेदकगौरवं तत्रव्याप
रवोधानुभवविरोधश्च लोकं पाक इत्यस्योपपादनविरोधश्च नैवं तत्र विवक्षाविरहादेव यत्नवद्धिभावः देवदत्तः पचतीत्यत्र विवक्षाश्रौव्यात् अ
न्यथा तस्य कर्तृत्वानुपपत्तेः धातुपात्तव्यापारवत एव कर्तृतेत्यात् अतः पचतीत्यत्र भासमानोपपत्तोऽवश्यं पच्यर्थौ द्यहिः कार्यः स एवाख्या
तार्थः विवरणे वेलायां भासमानस्य न तस्य परिशेषादाख्यातेवाच्यत्वकल्पनात् तत्रापि रथो गच्छतीत्यादेरनुरोधादनुकूलव्यापारत्वाविशिष्ट
त्वे धातुना विवरणे न संग्रहकलाघवाद्वानुकूलव्यापारस्य वशक्तिर्यत्नस्यापि तद्रूपेण संग्रहादिति मीमांसकाः मंडनमिश्रानुयायिनस्तु फ सि०
लमात्रं धात्वर्थः अनुकूलव्यापारो व्यापारमात्रं वाख्यातार्थः जन्यजनकभावः संसर्गो लभ्यः लडाद्यर्थो वर्त्तमानत्वादि विड्.थौ श्लेष्मसाधन ५४

© Dharmartha Trust J&K. Digitized by eGangotri

त्वादिव्यापार एवान्वेति आख्यातजन्यवर्तमानत्वप्रकारकबोधे तज्जन्यव्यापारोपस्थितेर्हेतुत्वकल्पनात् नच व्यापारविगमे फलसत्वे पाको
विद्यत इति स्यादिति वाच्यं भावार्थघञादेरनुकूलव्यापारार्थत्वात् अत एव व्यापारसत्वे फलानुत्पत्तिदशायां पाको भविष्यतीति न प्रयोगः ४ नापि
घटभूतलयोर्मिथः संयोग इतिवन्मिथो गमनमित्यादि संयोग इत्यादौ कृद्घञादेः प्रयोगसाधुतामात्रे धात्वर्थमात्रप्रतीतेः व्यापाररहितेपि व
स्त्वादौ संप्रयुज्यत इत्यादिव्यवहारात्तत्र तिङोपि न व्यापारोर्थ इति न सकर्मकत्वं आश्रयत्वस्यैवात्राख्यातार्थत्वात् नचैवं धात्वर्थतावच्छेदकफलशा
लित्वरूपकर्मत्वस्याभावादेरनुपपत्तेः प्रत्ययोपनीतपरसमवेतव्यापारजन्यधात्वर्थफलशालित्वस्य कर्मत्वात् प्रत्ययोपनीतेपरसमवेते च व्यापारस्य वि
शेषणं भूमिं प्रयाति विहग इत्य विहगादेरपि स्वापेक्षया भिन्नोपि स्वावयवः तत्समवेतव्यापारजन्यधात्वर्थफलसंयोगवत्वात् आत्मानं प्रयातीत्यादि वा
रणाय प्रत्ययोपनीतेति तादृशस्वार्थव्यापारस्य न परसमवेतः गमनात्मकव्यापारस्यैव प्रत्ययोपनीतत्वात् तस्य च परसमवेतत्वाभावात् गमनज
न्यविभागशालि पूर्वदेशे त्विव्याप्तिवारणाय धात्वर्थेति तण्डुलं पचतीत्यत्र आधेयत्वं द्वितीयार्थः फले धात्वर्थे तदन्वयः फलस्य जनकत्वसंबंधेनाख्या
तार्थे व्यापारे तस्याश्रयत्वे नचैत्रेन्वयः तण्डुलवृत्तिविक्लित्तिजनकव्यापारवांश्चैत्र इति धीः चैत्रेणापच्यते तण्डुल इत्यत्र तृतीयार्थवृत्तित्वस्य तिङर्थव्या

© Dharmartha Trust J&K. Digitized by eGangotri

सि० मु० रेतस्य जन्यत्वसंबंधेन धात्वर्थे फले तस्याश्रयत्वेन तंडुलादावन्वयः चैत्रवृत्तिपरसमवेतव्यापारजन्यफलवांस्तंडुल इति धीः फलव्यापारयोर्वि
५५ शेषणविशेष्यभावे व्यत्यये भेदेन कर्तृकर्मव्यवहारः अथ सुबर्थस्य धात्वर्थेऽन्वयः कुत इति तस्याख्यातान्वयकल्पने मप्युक्तं एवं चाख्यातार्थव्यापारस्य
धात्वर्थविशेषणत्वमपि इति विभाव्यते तर्हि तृतीयाव्यापारस्वार्थः तत्र वृत्तित्वं प्रकृत्यर्थस्य संसर्गः व्यापारस्य तज्जन्यत्वेन धात्वर्थफलेऽन्वयः तस्य निरूपि
तत्वसंबंधेन निरूढार्थेऽधिकरणत्वे तस्य तंडुलेऽन्वयः कर्मकर्तृतः फलाश्रयः कर्तृकृतश्च व्यापाराश्रयोऽर्थः तंडुलः पक्ष्यः चैत्रो गंता इत्यादिसामानाधिक
रणानुरोधात् कर्मप्रत्यये सुबर्थ एव व्यापारे वर्तमानत्वान्वयः कृत्कृतश्च व्यापाराश्रयोऽर्थः तंडुलः पक्ष्यः चैत्रो गंता इत्यादिसामानाधिक
रणानुरोधात् कर्मप्रत्यये सुबर्थे नवमिन्नपदोपात्तान्वये विप्रसंगः फलबोधकधातुसमभिव्याहृतकर्माख्यातजन्यवर्तमानत्वबोधे तृतीया
जन्यव्यापारोपस्थितेर्हेतुत्वात् पक्ष्यवानित्यादौ कर्तृप्रत्यये तु एकदेशे व्यापार एव वर्तमानान्वयः तस्य निरूपितत्वसंबंधेन निरूढार्थेऽधिकरणे पद
व्यापारेण आश्रये च एवं च शक्तिः विशिष्टमन्यलभ्यं अत एव एवकारस्य अयोगव्यवच्छेदे च शक्तिः अन्ययोगप्रतियोगिकव्यवच्छेदः श राम०
क्यो पार्थ एवमनुष्ठा इत्यादेः असंगतेः पार्थान्ययोगो घटकोऽस्तु मद्यपाभावसमनुष्ठत्वेसत्त्वात् नैवान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदः श ५५

© Dharmartha Trust J&K. Digitized by eGangotri

कः वस्तुमात्रस्य च किंचिदपेक्षणीयत्वात् अप्रसिद्धेः नचान्यसंयुक्तत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदेनान्यसमवेतत्वावच्छिन्नव्यवच्छेद इत्यस्य सा
दोषप्रसिद्ध इति वाच्यं पार्थ एव धनुर्धर इत्यादौ बाधितत्वात् पार्थस्यापि कुन्तिभिन्नत्वेन तत्समवेतत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य धनुर्धरे
विरहात् पार्थान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्यान्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदाद्भिन्नत्वेनापातदस्य (?) संसर्गत्वे
एवं च नीलो घटो नास्तीत्यत्र नीलान्वितस्य घटस्याभावेऽन्वयात् नीलघटत्वावच्छिन्नप्रतियोगित्वं संसर्गः तथा पार्थान्वितस्यान्ययोगस्य
व्यवच्छेदेऽन्वयात् पार्थान्ययोगत्वावच्छिन्नप्रतियोगिताकत्वं संसर्ग इति बोध्यं नच प्रतियोगितामात्रेणान्ययोगविशिष्टो व्यवच्छेदः बोध्य
ताम् व्युत्पत्तिबलादुक्तव्यवच्छेदलाभसंभवादिति वाच्यं वाक्यार्थलाभस्यैवमुपपत्तेऽप्येकपदार्थस्यान्यलभ्यत्वात् नचैकपदार्थयोः क
थं मिथोऽन्वय इति वाच्यं आख्यातार्थकर्तृकालान्वयस्य पूर्वैरभ्युपगमादित्याहुः केचित्तु व्यापारमात्रं धात्वर्थः गतो गम्यते ग्रामः इत्यादौ फल
स्य कृदादिनैवाभ्यासेवलाभात् ग्रामं गच्छति ग्रामस्य पूर्वैरभ्युपगमादित्याहुः केचित्तु व्यापारमात्रं गन्तेत्यादावपि द्वितीयादेः फलजन
कत्वमर्थः आदेशशक्तिप्रसंगीकारे तु तस्मादिति द्वितीयापारवशेऽर्थः पदार्थव्याकरणत्वेन लक्षणा फले चाधिकरणत्वसंसर्गेण नामार्थे चेति

© Dharmartha Trust J&K. Digitized by eGangotri

पथा फलमात्रमर्थो जनकत्वं संसर्गः नचैवं ग्रामं गच्छति त्यजतीत्यादौ फाल

© Dharmartha Trust J&K. Digitized by eGangotri